अथ

"न्याय.सिध्दान्तमंजरी"

९८७
(जानकीनाथ विरचिता)

व्याख्या सहिता

व्याख्याता: - नरसिंह:"

107/10

अत्रस्र

न्य.सि.टी. १ ॥ ॥श्रीगणेशाय नमः॥ ॥नत्वा गुरुपदद्वंद्वं चिंतयित्वा सितं महः॥ सिद्धांतमंजरीभूषां करोमि शिशुकर्णयोः॥ श्रीमत्श्रीयुतगौ
डमंडलमहीविख्यातसत्कीर्त्तितास्तत्कीलेकृतिनः परेस्तुकृतिनो गोविंदनामाभिधाः तत्सूनुर्नरसिंह एष सुकृतीभावं तु यं
चाननो बालानां हितकौतुकया स्फुटयति द्राकन्याय सिद्धांतितेः। सिद्धांतमंजरीं तर्कमधुरक्तमधुव्रतानां मार्गणानुकर्तुमा
मोदवातभावो विविच्यते। ईप्सितग्रंथप्रतिबंधक डुरितनिवृत्तये कृतं परमात्मनमस्काररूपं मंगलं शिष्यशिक्षायै ग्रंथा
दौ निबध्नाति। प्रणम्येति। परमात्मानं प्रणम्य ज्ञानकीनाथशर्मणा न्यायसिद्धांतमंजरी क्रियत इत्यन्वयः। ईश्वरात्मनिम
हत्वपरिमाणस्पदाधितिकृद्सम्मतत्वात्तस्य जीवात्मसाधारणेन नमस्कार्य्यतानवच्छेदकत्वाच्चात्र परमत्वं सर्वज्ञत्वनि राम
त्यकृतिमत्वादिकमेवेति मंतव्यं। आत्मत्वं तु जीवात्मईश्वरात्मसाधारणात्मपदशक्यतावच्छेदकत्वेन सिध्यतीति ध्येयं। १

भी१ कारणतावच्छेद१

नचैवमभावपदशक्यतावच्छेदकतयाऽभावत्वमपिजातिःस्यादितिवाच्यं।भवतामपिकार्य्यतावच्छेदकतयाजातिसिद्धिरितिनिय
मेजन्यसत्वकार्य्यतावच्छेदकतयाध्वंसादेरपिजातित्वापत्तेः।यदिवाऽसतिबाधकइतितद्याऽप्रेऽभिनिवेशयतेतदाप्रकृतत्याप्याच
पितत्रिवेशपमितितुल्यं।अत्रनमस्कारनिष्ठभक्तित्वश्रद्धात्वादिप्रकर्षजातिविशेषप्रापकंनमःपदसमभिव्याहृतंप्रेत्युपस
र्गपदंतथाचप्रकृष्टनमस्कारंकृत्वेत्यर्थः।तथाचशास्त्राहितमंगलंभवतीतिभावः। [illegible]
नी३ कैःकृत्वेत्यं होयुक्तौमुक्तायुक्तिमुक्ताताभिरित्यर्थः।तथाचात्रयुक्तीनांमुक्तासारूप्यनिर्देशान्निर्मलत्वंसूचितमितिभावः
मंजरीपदाद्बद्धकोमलत्वंसूचितमितिभावः।प्रयोजनज्ञानंविनाशास्त्रेप्रवृत्तिरेवनस्यादतआह।इहेति।इहसंसारेकिलनि
खिलेनिखिललोकानांश्रवणाधिकारिणां।तेनगंगादिमरणानंतकस्यचितस्त्रीशूद्रादिलोकस्यमुक्तावपिनक्षतिः।विमुरंमु

यएव३
युक्तिमुक्ताभिरिति३।। वती२ अत्रसं१

नसाह्यात्साधनत्वेर
५४

सि.म.न.

ख्योपायंतत्वज्ञानंमाममननंतीतियोजना।मननोपायमिति।मननंउपायीभूतंयत्रतत्मननोपायं।मननेनप्रयोज्यमित्यर्थः।तेनतत्व
ज्ञानंप्रतिमननस्यनिदिध्यासनद्वाराकारणत्वेपिनप्रयोजकत्वहानिरितिध्येयं।एतच्चतत्वज्ञानविशेषणं।तथाचमननेनप्रयो
ज्यंतत्वज्ञानमित्यर्थः।यद्यपिकाशीमरणजन्यमुक्तिस्थलेशिवस्यतत्वोपदेशकत्वेनतत्वज्ञानसामान्येमननंनोपायीभूतं।
तथापितत्वज्ञानपदेनतत्वज्ञानविशेषउक्तः।सचविशेषोमननादिजन्यतावच्छेदकतयासिद्धः।अतएवनिखिललोकपदं
श्रवणपरत्वेनविवक्षितं।तथाचश्रवणवतांविमो मुख्योपायंतत्वज्ञानंमननप्रयोज्यं।नतुतत्वज्ञानसामान्यं।अतोका राम
शीमरणजन्यमुक्तौश्रवणादिमत्वेनाधिकाराभावात्।तदुपायीभूतशिवोपदेशजतत्वज्ञानेमननाप्रयोज्यत्वेपिनक्षतिरि २
तिभावः।तच्चेतितत्रमननंप्रमाणाधीनमिति।मंतव्यश्चोपपत्तिभिरितिदर्शनात्।यद्वातत्रतत्वज्ञानमित्यर्थः।तदादिसर्वना

५३

र्थः२

ग्रः आकांक्षावशात् उत्सर्गतो विशेष्यबोधकत्वं यथा नीलपटो सुंदरः स च मानीत्यादौ न नीलाद्युपस्थापकत्वं सर्वनाम्नः किंतु सुंद
रादिविशेष्यस्यैव तथा प्रकृतेपीत्यपि केचित् प्रमाणं निरूप्यत इति प्रतिज्ञा च शिष्यावधारणार्थमि त्य[illegible] तत्र लक्षणस्वरूपा
दिभिः प्रमाणं निरूपणीयं प्रमाकरणं चक्षुरादि प्रमाणमिति लक्षणार्थः अत्र करणं प्रमाणमित्युक्तौ कुठारादावतिव्याप्तिरत उ
क्तं प्र मेति प्रमाकरणमित्युक्तौ संस्कारद्वारा स्मरणजनके अनुभवे तिव्याप्तिरत उक्तं प्रतिस्मृतेरप्रमात्वात् प्रमाकरणात्व घटकी
भूतप्रमात्वस्यानुभवगर्भितत्वात् अत एवानुभवत्वगर्भितं प्रमात्वमग्रे वक्ष्यतीति ध्येयं न नु तत्तद्वति तत्प्रकारकज्ञानत्वं प्रामा
ण्यं ज्ञानस्य तथा च तदाश्रयीभूतस्मृतिं प्रति संस्कारद्वाराकरणत्वेनानुभवस्य प्रमाणत्वापत्तिरत आह प्रमा चेति [illegible] द ल२
णो प्रमा चेत्यर्थः तथा चानुभवइत्यनेन स्मृतेर्निरासात् प्रकृते अनुभवत्वगर्भितं प्रामाण्यं स्मृतिव्यावृत्तमेव प्रमाणलक्षण

इत्यर्थः३

अत्र ल२

सि॰टी॰
३

थौ२

निविष्टमितिनानुभवस्य संस्कारादेव अतिरिक्तप्रमाणत्वापत्तिरितिभावः॥ स्वोक्तप्रमाणलक्षणं निविष्टप्रमा लक्षणे प्राचीनस
म्मतिमाह तत्राहुरिति। सामान्यत एव सर्वत्र प्रमात्वमाहुरित्यर्थः॥ अत एव यथार्थानुभवो मानमनपेक्षतयेष्यत इति न्यायकुसु
मांजलावाचार्यैः। तत्रानपेक्षतया इतरप्रामाण्यानधीनप्रामाण्यतया। तथा च स्मृतेर्जनकानुभवसमानविषयतया तत्
प्रामाण्याधीनप्रामाण्यकतया सापेक्षत्वात् न प्रामाण्यमित्यर्थः॥ अत्राहुरित्यनेनास्वरसः सूचितः॥ स च लाघवात्। तद्वति त
त्प्रकारकैकरूपप्रामाण्यस्य सर्वसाधारणस्य संभवादलमनुभवत्वप्रवेशेन। अचिरेणैतद्व्यक्तीकरिष्यति। तद्वति तदवगाहित्व
मित्यादिना प्रमाकरणविशेषस्यानुभवगर्भितप्रमाकरणस्यैव वा प्रमाणत्वात्। संस्कारानुभवादावतिरिक्तप्रमाणत्वापत्तिः॥ राम ३
यदसाधारणंकारणं प्राप्यमनो बहिर्गोचरां प्रमां जनयतीत्यत्र व्याप्तोच प्रमात्वस्यानुभवत्वगर्भितत्वात्। एतस्या एव वाच्या

लै३ लै२ वै३

स्ये३ स्प४

प्रेरप्रयोजकत्वात्। एवं च स्मृतिर्यथार्थेत्यभियुक्तानां व्यवहारोऽपि संगच्छते। अत एव विशेष्यावृत्त्यप्रकारत्वं प्रामाण्यं स्मृति
साधारणं निर्विकल्पकसाधारणं चेति मणिकृतः। तदवगाहित्वं तत्प्रकारकत्वं लक्षणे संगमयति। भवति हीति। तद्वतीति तद
वगाही तद्वति तत्प्रकारक इत्यर्थः। अल[illegible]लरूपमसत्त्वमाह। शुक्ताविदं रजतमिति तदवगाही रजतत्वावगाहीत्यर्थः। इदं
याथार्थ्यं च ज्ञानेच्छादिसाधारणमिति ध्येयं। अत्रातिव्याप्तिं शंकते नन्विति। लक्ष्यत्वमेव तस्यांगीकुर्वन् परिहरति। रजतत्वांशे
ति। निश्चयत्वाग्रिमिति स्वोक्ते प्रामाण्ये प्राचीनसम्मतिमाह। तद्वतीति। तथा च संशयोऽपि अनुभवत्वमेवाधिकं लक्षणे निवेशयन्ति।
ननु निश्चयत्वमपीति। संशयेऽपि प्रामाण्यं सिद्धमिति भावः। ननु तथा न प्रमात्वस्य मूलस्यातदनवच्छेदकत्वात्। संयोगानवच्छेद
कत्वात्। तथा चावच्छेदकत्वाभाववति अवच्छेदकत्वावगाहनात् मूलेऽवच्छेदकत्वधीरप्रमेति भावः। प्राकृजिज्ञासितम[illegible]भवतु।

त१ तु२

त्वेनु बुद्धित्वोपलब्धिवत् ४

जीर्णमते निर्विक्तिस्मृतीति। नवीनमते त्वाह। जातिविशेषइति। जातिविषयत्वादिति। इदमुपलक्षणं। विशेषणज्ञानकार्य्यतावच्छेद
ककोटिप्रविष्टत्वेनापि अनुभवत्वजातिसिद्धेः। अत एव विशिष्टानुभवं प्रत्येव विशेषणधियो हेतुत्वस्येति दीधितिकृतो वदंति। वस्तु
तोऽनुभवत्वस्य प्रत्यक्षात्मकमेवेति। नानुमित्यादिसाधारणं। अन्यथा वह्निसंसर्गाद्यनुमितिशाब्दोत्तरं च वह्निमनुमिनोमीत्यादिवत्
वह्निमनुभवामीतिबोधः स्यात्। एवं संसर्गशाब्दोत्तरमपि संसर्गमनुभवामीति च स्यात्। एवं च साक्षात्कारत्वमेवानुभवत्वं। तत्रैवानुभवा
मीति च दर्शनात्। तथा च प्रत्यक्षादिचतुर्ष्वनुभवव्यवहारे विषयीभूतं स्मृतिभिन्नज्ञानत्वोपाधिरूपमेवानुभवत्वं तदेव च विशे
षणज्ञानजन्यतावच्छेदकं तत्त्वोपाधिरूपं मनसोऽस्योपेयं इति नानुव्यवसायगम्यं प्रत्यक्षेऽनुभवामीति बोधविषयता चानुभवत्व
रूपसाक्षात्कारत्वजातिमादाय स्मृतिभिन्नज्ञानत्वोपाधिमादाय तत्त्वोपाधिभूतं प्रत्यक्षादिचतुर्ष्वपि प्रमि[illegible]ति जीर्णमतमेव दोषा

नत्रे तिथि

त्रिरस्त्वमितियुक्तमुत्पश्याम॥ ननूक्तप्रमाणलक्षणेकरणत्वं किंतदाह। व्यापारवदिति। दलद्वयोः क्रमेण फलमाह। घटं प्रतीति।
असाधारणेतीति। असाधारणपंचकार्य्यत्वातिरिक्तकार्य्यत्वव्याप्यतद्धर्मावच्छिन्नकार्य्यतानिरूपितकारणतावत्त्वमित्यर्थः। नन्वे
वमिति। एवमसाधारणकारणत्वस्य करणताघटकत्वे। आत्ममनःसंयोगस्येति। इदमुपलक्षणं। आत्मनोज्ञानं प्रत्यसाधारण
त्वाद्वेत्यपि ध्येयं। इष्टापत्त्यापरिहरति स्यादेवेति। व्यवहारभेदः करणत्वकारणत्वादिव्यवहारवैचित्र्यं। अत एव एकस्यैव वक्तुः
नकरणत्वकारणत्वादेर्भेदादेव अत एव वक्तुरिच्छाया विभक्तिनियामकत्वादेव। अंगीचक्रुरित्यनेनास्वरसः सूचितः। [illegible]कारण सत्र
त्वादेरखंडोपाधित्वे गतंकंबुग्रीवा[illegible]दिमत्त्वादिसखंडोपाधिना किंचकार्य्यत्वादेवप्येवमखंडोपाधित्वे कार्य्यत्वावच्छिन्नं प्रत्यदृष्टत्वे
नकारणत्वसंभवात्। अदृष्टत्वादेः कारणतावच्छेदकतया जातित्वापत्तेश्चेत्याद्यूह्यं। न्यूनातिरिक्तवृत्त्यादिनाभतव्यवच्छेदायाह। तत्त्वेति।

प्रमाण

णत्वादिति ध्येयम्॥प्रमाण॥२

सप्ति १

तत्रेतिसप्तमीतथाचचतुर्विधप्रमाणेनिरूपणीयेसतीत्यर्थः॥प्रथमोद्दिष्टत्वात्प्रत्यक्षलक्षणमाहसाक्षात्कारित्वेतिप्रमेतिप्रकृताभिप्रा
यंप्रमाकरणनिरूपणस्यैवप्रतिज्ञातत्वात॥वक्ष्यतोसाक्षात्कारित्वमकरणस्यापिचक्षुरादेःप्रमात्वात्॥ज्ञानित्वेचसाध्वइयंसाक्षा
त्करोमीत्यनुगतप्रतीतिः॥समाधत्तेज्ञानमात्रेतितथाचानुमित्यादावपिसाक्षात्करोमीतिप्रतीतिःस्यादितिभावः॥नतुज्ञान
मात्रेमनसोमनस्त्वेनजन्यकतानतिंद्रियत्वेनविवक्षितंचात्रतथेत्यतआह॥ [illegible]
[illegible] इं
द्रियाप्रतीतावपीति॥तथाचनतादृशोपाधिरूपंसाक्षात्कारत्वंअपितुजातिरूपमितिभावः॥नन्वनुगतप्रतीत्याचेत्जातिसिद्धिस्त
दाप्रमात्वादेवपिप्रमेत्यनुगतप्रतीत्याजातित्वापत्तेः॥नचसाक्षात्कारत्वावच्छिन्नंप्रतिइंद्रियत्वादिनाकारणत्वात्कार्यतावच्छेदकत

यासाक्षात्कारत्वंजातिरितिवाच्यं।ईश्वरसाक्षात्कारसाधारणसाक्षात्कारस्यकार्य्यतानवच्छेदकत्वात्कारणतावच्छेदकस्यइंद्रियत्व
स्यैकस्याभावादुक्तानुगतप्रतीत्याचप्रमाणांतरागोचरतयालौकिकविषयतायाएवविषयीकरणादतआह।यद्वेति।नव्या
क्षसाक्षात्करोमीतिप्रतीत्यालौकिकविषयतैवावगाह्यतेनतुजातिरन्यथागतेतादृशविषयतयेत्यतआह।यद्वेति।तज्जन्यधीः दृ॰२
व्याप्तिज्ञानश्रुतिदेशवाक्यार्थज्ञानपदज्ञानादितज्जन्यमात्रवृत्तिजातिरनुमितित्वोपमितित्वशाब्दत्वादितत्शून्यत्वंप्रत्य
क्षेइत्यर्थः।ईश्वरज्ञानजन्यप्रत्यक्षवृत्तिचाक्षुषत्वादिजातिशून्यत्वाभावेनाव्याप्त्यापत्तेर्जन्यत्वंधीविशेषणं।एवंधीपदत्यागे
पिजन्येतरचक्षुरादिजन्यचाक्षुषमात्रवृत्तिचाक्षुषत्वमादायाव्याप्तिदोषएवबोध्यः।जन्यधीमात्रवृत्तिजातिशून्यत्वमित्येताव
न्मात्रेकृतेचाक्षुषत्वादिमादायपुनरव्याप्तिरतोद्वितीयंजन्यत्वंनिवेशितं।तथाचजन्यधीजन्यमात्रवृत्तिजातिर्नचाक्षुषत्वादिकंनि

विकल्पेपिचाक्षुषत्वसत्वात्तन्नाव्याप्तिरितिभावः।जन्यधीजन्यवृत्तिजातिशून्यत्वंएतावन्मात्रेकृतेज्ञानत्वसत्तादिजातिमादायासंभवः
इत्यतोजन्यधीजन्यमात्रवृत्तित्वंजातिविशेषणं।जातिपदंचसमवायेनवृत्तिताशून्यत्वलाभायतेनतादृशजातेरनुमितित्वादेः
कालिकेनसंबंधेनसाक्षात्कारेसत्वेपिनासंभवः।तादृशजातिशून्यत्वमित्येतावन्मात्रेकृतेघटादावतिव्याप्तिरितिज्ञानत्वप
र्य्यंतानुधावनंलक्ष्येलक्षणंलापयति।भवतिहीतिवक्ष्यतेइतोपिलघुतयावैशिष्ट्यावगाहिज्ञानवृत्तिअनुभवत्वव्याप्यजा
तिमत्त्वंतत्रइंद्रियत्वस्यावच्छेदकोपाधितयाजन्यसाक्षात्कारत्वावच्छिन्नंप्रतिइंद्रियत्वमनस्त्वादिनावाकारणत्वात्।कार्य्यतावच्छे
दककोटिनिविष्टतयैवजन्यसत्वेनध्वंसत्वेनकार्य्यकारणभावेकारणतावच्छेदककोटिनिविष्टतयासत्त्वेवसाक्षात्कारत्वजातिसि राम
द्धेस्तादृशजातिमत्त्वंवातद्धितत्वंलक्षणेव्याप्तिमाशंकतेनचेति।निदिध्यासनजन्येति।तथाचनिदिध्यासनजन्यतावच्छेदकतया ६

मोक्षजनकतावच्छेदकतयावातादृशजातिसिद्धिः।एवंचकाशीमरणेशिवतत्वोपदेशान्मुक्तावपिनक्षतिरितिभावः।मानसेति
।तथाचमोक्षजनकतावच्छेदिकानिदिध्यासनजन्यतावच्छेदिकावाजातिर्नमानसावृत्तिर्नातितद्व्युदासइतिभावः।ननुमानस
त्वस्यमानोजन्यरूपस्यनानात्वान्नैतदनुगतलक्षणसंभवइत्यतआह।मानसत्वंचेति।वैशिष्ट्येति।तथाचवैशिष्ट्यावगाहिनिर्वि
कल्पकंतन्मतेसाक्षात्काररूपमित्यर्थः।अयंघटइत्यादिज्ञानेवैशिष्ट्यविषयकज्ञानेइत्यर्थः।बाधकंविनेति।इदमुपलक्षणं।
यत्तुतअयंघटइतिविशिष्टसाक्षात्कारानंतरंसाक्षात्कारीत्यनुभवस्यानुगताकारस्यसाधकस्यापिसत्त्वादितिध्येयं।घटत्वादेरि
तितथाचघटघटइत्याद्यनुगतमतेःकारणनियम्यत्वान्नघटादेरेवज्ञातेःसतःकारणत्वादितिभावः।नित्यज्ञानानंगीकर्तृमता
दिमतंव्यवच्छेत्तुमाह।सचेति।निर्विकल्पस्यवैशिष्ट्यविषयत्वमस्त्येवपरंवैशिष्ट्यसांसर्गिकाविषयतानेतिलक्षणासंभवइत्यतआह।

सिद्धां-टी-न
७

निष्प्रकारकंवेति। ~~नेति~~ तन्नेति।तत्तन्निर्विकल्पकं। ~~अनुमेयमिति~~। अनुमेयमिति। अनुमानंच अयं घटइति। प्राथमिकविशिष्टसाक्षात्का
रविशेषणज्ञानजन्यविशिष्टज्ञानत्वात्। द्वितीयादिविशिष्टज्ञानवत्। अत्रानुमानेकार्यकारणभावेअनुकूलतर्कमाह। तथाहीति।
तदानीं प्राथमिकविशिष्टसाक्षात्कारपूर्वंतथाचविशेषणज्ञानाभावेकथमाद्यविशिष्टसाक्षात्कारः स्यादित्यर्थः। ननु। आद्यघ
टत्वादिविशिष्टसाक्षात्कारपूर्वंविशेषणघटत्वादिज्ञानस्यघटत्वादिविशिष्टज्ञानात्मकस्यासंभवात्। तत्तद्विशेषणज्ञानंभ्रा
न्तः शंकतेनचेति। तत्र आद्यविशिष्टसाक्षात्कारेभ्रमंनिराकृत्यसमाधत्तेअव्यवहितेति। पुनर्भ्रान्तः शंकते। नचभागवतेति। भ्रमंनि
राकुरुते। सामानाधिकरण्येति व्यधिकरणत्वात् त[illegible]लीभूतविशिष्टज्ञानासमानाधिकरणज्ञानात्। तत्राद्यविशिष्टसाक्षात्कारादौत
देवविशिष्टज्ञानंविशिष्टस्मरणात्मकंविशिष्टज्ञानंइत्यर्थः। विशिष्टानुभवेति। तथाचविशेषणज्ञानकार्यतावच्छेदककोटिप्रविष्टतया।

राम
७

फर टी १

तरापे २ न २

अनुभवत्वं जातिः सिद्धा तीत्य पि गंतव्यं। अन्यथा विशिष्टस्मरणं प्रत्यपि विशेषणज्ञानकारणत्वेऽनवस्थानादिति मिविशिष्टस्मरणे
पि विशिष्टस्मरणां ऽपेक्षणात् तत्रापि च विशिष्टस्मरणांतरापेक्षणात् इत्यर्थः। अनवस्थां परिहरति। अनुक्तं चेति। तथा च घटत्वप्रका
रकघटविशेष्यकनिश्चयत्वकारणतावच्छेदकं घटत्वातिरिक्ताप्रकारकस्मृतित्वं कार्यतावच्छेदकं निर्विकल्पकसाधारणं
न चैवं घटो द्रव्यमित्यनुभवात् घटो द्रव्यमिति स्मरणानुपपत्तिः घटत्वातिरिक्तस्य द्रव्यत्वादेरपि प्रकारत्वादिति वाच्यं घ
टत्वाप्रकारकत्वे सति अतिरिक्ताप्रकारकान्यघटविषयकस्मृतित्वस्य निर्विकल्पकेऽस्मृतौ अदृष्टविशेषणस्यैव कारणतानतु
निश्चयस्येत्यत आह। किंचेति। अन्वयव्यतिरेकाभ्यामिति। अत्र नव्याः। विशिष्टबुद्धिं प्रति विशेषणज्ञानहेतुत्वे सिद्धे आद्यविशि
ष्टप्रत्यक्षानुरोधेन निर्विकल्पकसिद्धिस्तु दैवचमानं पश्यामः। न तु विशिष्टबुद्धित्वं नाम एकं सामान्यमस्ति तस्य वैशिष्ट्यादिभेद

स्मृतिसाधारणस्य कार्यतावच्छेदकत्वात् इति भावः। ननु स्मृतिं प्रति विशिष्ट्यनिश्चयस्याव श्यं हेतु त्वाद्दूरं चेत्रत्व प्रकारक ३
घटत्वाति ३ न १

रिष्टापत्तिः३

भिन्नत्वात्।घटत्वादिविशिष्टसाक्षात्कारत्वत्वादिकं।आद्यविशिष्टप्रत्यक्षात्पुरोधेनतत्रचसन्निकर्षव्याप्तिज्ञानादेरेवविशिष्टहेतुत्वसंभ
वात्।नविशेषणज्ञानस्यकारणत्वंनचैवंसन्निकर्षादितःकदाचित्द्रव्यंकदाचित्घटइतिविभिन्नप्रकारकज्ञानेकिंनियामकमि
तिवाच्यंसन्निकर्षात्तत्तद्वृत्तियोग्ययावद्धर्मघटत्वद्रव्यत्वादिप्रकारकयुगपत्ज्ञानोत्पत्तेर्नैकैकक्रमिकतावद्धर्मविशिष्टबोधः
अनुमित्यादौतुतत्तद्धर्मावच्छिन्नव्याप्त्यादिज्ञानस्यनियामकत्वात्।नैकदातावद्धर्मविशिष्टबोधः।नचैवंघटचक्षुःसंयोगानंतरं
कदाचित्तृतीयचतुर्थादिक्षणेघटमनुभवामिकदाचिद्द्रव्यमनुभवामीतिनस्यादितिवाच्यं।अदृष्टविशेषस्यैवतन्निया
मकत्वात्।अन्यथानवमतेपिघटोद्रव्यमितिविशिष्टबोधानंतरंकदाचित्घटमनुभवामिकदाचित्द्रव्यमनुभवामिकदाचिद् राम ६
घटंद्रव्यंचानुभवामीत्यनुव्यवसायस्यानुभूयमानस्यउपपन्नत्वेनादृष्टविशेषस्यैवनियामकस्यवक्तव्यत्वादिति।अथघटचक्षुः

तृअर

न्य२ तु१ वे३

संयोगानंतरंकदाचित्पृथिवीकदाचित्घटःकदाचिद्द्रव्यंइत्यादिबोधस्यानुभूयमानस्यापलापापत्तेः सर्वत्रैवघटचक्षुःसंयोगानंतरंनि
यमेनघटत्वनियो[illegible]याविद्धर्मप्रकारकसमूहालंबनबोधापत्तेश्च किंचघटचक्षुःसंयोगानंतरंयोग्ययावद्धर्मप्रकारकसमूहालंबन
बोधापत्तेश्च। किंचघटचक्षुःसंयोगानंतरंनियमेनघटवृत्तियोग्यपदार्थधर्मप्रकारकबोधेसिद्धेतत्रैवघटेअनुभूयमानपृथिव्यादि वीत्वा२
संशयानुपपत्तेः तस्यापिनिर्णयात्। नचैवंघटघटत्वनिर्विकल्पावसरेतद्वृत्तिद्रव्यत्वपृथिवीत्वादिनिर्विकल्पकसंभवेघटवृ
त्तियोग्ययावद्धर्मप्रकारकबोधापत्तौनकिंचिदपिबाधकंतन्मवमतेपातितवापिकथंतत्रैवघटेपृथिव्यादिसंशयइतिवाच्यं।
तत्रफलबलात्निर्विकल्पकमेवपृथिवीत्वादेर्नहत्तमितिकल्प्यतेअदृष्टाभावादितिचेत्नअदृष्टस्यशरणीकरणीयत्वेगतंविशे
षणज्ञानकारणत्वेनगतंचतदनुरोधान्निर्विकल्पेनकदाचित्घटःकदाचित्पृथिवीत्यादिबोधेअदृष्टविशेषस्यैवनियामकत्वादि

नथा३ वीत्वा३

मि॰मुं॰टी॰न॰
१८

तिषाङ्गः।वैशिष्ट्यावगाहीत्युक्तेनिर्विकल्पकेपिघटत्वादिविषयितावत्तत्वैशिष्ट्यविषयितायाअपिसंभवादितिव्याप्त्यापत्तेराहसप्रकारकं
चेति।ननुविषयतायाविषयरूपत्वेअनुगतधर्मेतीतिर्नस्यात्तविषयस्यनानात्वादतआहापदार्थांतरमिति।एकदेशिनःनवीनाःज्ञा
नजन्यइति।अत्रज्ञानंनिमित्तकारणंघटःसमवायिकारणंभावकार्य्यंसासमवायिकारणकंइतिनियमोनतन्मते।एकत्वादेर्व्यभि
चारात।यदिचकपालेकत्वादिकत्वेःसमवायिकारणंतदातत्रापिज्ञानमेवासमवायिकारणंकिंतुभावकार्य्यंसमवायिकारणजन्य
मितिनियमैंनथासतिअभावादेर्ज्ञानसंबंधरूपपाकद्यानुपपत्तेरितिध्येयं।[illegible]
[illegible]ज्ञानकर्म्मत्वमिति।घटंजानातीत्यादेर्ज्ञानजन्यफलशा एम १८
लित्वमेयघटादेःकर्म्मत्वंनत्वविनाज्ञानजन्यज्ञाततांननिर्वहती।तिभावः।नचसमवायिकारणंविनेतिसमताभिप्रायेणअन्यथाप

स्तत्वमनेनास्ति३ मेनघटेक॰४ मितिविभावासे४ मस्त॰४

त्वा२ त्व३

रमतेऽभावादौ ज्ञानत्वानुपपत्तेरिति ध्येयं।कर्म्मविभक्तेरिति।तथा च क्रियाभेदात्।फलभेदाद्वा कर्मत्वं नैकमिति घटं जानातीत्यादौ ज्ञा
नविषयात्मकस्वरूपसंबंध एव कर्म्मत्वमिति भावः।तद्देवेति।विनष्टघटादिस्थलीयकर्म्मविभक्तिवदित्यर्थः।प्रकारताविषयता
विशेषानंगाकर्तुर्न्नयेत्याह।भासमानेति।संसर्गतयाभासमानं यद्वैशिष्ट्यं तत्प्रतियोगित्वं तन्निरूपकमित्यर्थः।दिगर्थक्षप्रति
योगित्वस्यातिरिक्तस्य समूहालंबनव्यावृत्तस्यागाकारेवरंप्रकारत्वविषयतातिरिक्ताक्षकतंनामांतरकल्पनेन किंच प्रति
योगित्वातिरिक्तोगाकारे विनिगमनाविरहेणापि चातिरिक्तकल्पनासिद्धेः इत्यलमधिकेन।सामान्येन प्रत्यक्षं निरूप्य विशे
षेण निरूपयति।तच्चेति।तत्साक्षात्काररूपज्ञानकरणं।ननु द्वितीयानुव्यवसायरूपसाक्षात्काररूपप्रमायां मन इव व्यवसा
यस्यापि करणत्वात्।एवं हानोपादानादिबुद्धेरपि निर्विकल्पस्य करणत्वात् सन्निकर्षस्य च सविकल्पकसाक्षात्कारिप्रमाकरणं

रवे ४ करणे ४

स्यापिसत्वेनवह्निविषत्वात्साक्षात्कारिप्रमाकरणस्य द्वैविध्यासंभवइत्यतोइंद्रियात्मकमिति।यद्वाअत्यक्षपदेनफलस्याप्युपस्थितेस्तत्र
चद्वैविध्यानुपपत्तेराह।इंद्रियेति।तद्ग्राहकंद्रव्यविषयकलौकिकसाक्षात्कारजनकमित्यर्थः।तेनउपनीततयाचक्षुर्ग्राहकत्वसत्त्वा
दोनातिप्रसंगइतिभावः।द्रव्यग्राहकत्वदितरग्राहकयोःक्रमेणगणनमाह।द्रव्यग्राहकेति।अन्यतद्रव्येतरग्राहकं।अवस्यापि
ति।अपिनाचक्षुषःसंग्रहः।अतएवविप्रकृष्टपदंसार्थकंअन्यथाऽवस्यविशेष्टाविप्रकृष्टयोःसाम्यात्विप्रकृष्टपदमनर्थकंस्या
दितिभावः।सर्व्वविषयत्वंसर्व्वविषय[illegible]ज्ञानजनकत्वमित्यर्थः।सर्व्वविषयकत्वेपिसर्व्वविषयकप्रत्यक्षजनकत्वेपीत्यर्थः।परतंत्रंइत
रणसापेक्षमित्यर्थः।तथाचोधादेश्चक्षुर्भिन्नोपिविप्रकृष्टघटादेर्नसहकारिणंविनामानसमितिभावः।इतरकारणान्याहपरमिति। राम
नत्वात्मामनसासंयुज्यतेमनःइंद्रियेणइंद्रियमर्थेनेतिप्रणाल्याज्ञानजननात।मनश्चक्षुरादींद्रियमात्रपरतंत्रंनपुनः।सन्निकर्ष १०

योर

सति१

परतंत्रंइतिकस्यचिद्भ्रमंनिराकरोति।नपुन श्चक्षुरादिमात्रमिति।तथाउपस्थितिर्योगजधर्मादिसहकारिणामपेक्षाकदाचिदपि
चक्षुरादीनांनस्यादित्यर्थः।उपस्थित्यादीनांसहकारित्वंद्रढयति।स्मृतेति।श्रवा[illegible]द्यवक्तृनि।आत्मश्चात्मसमवेततत्समवेतेत्यर्थः॥
कार्यवाद्यनियोग्यानातिशेषः।अतएवत गोग्यगुणाःइत्युक्तं।नतुतद्गुणाइतिध्येयं।टीकाकृतनामनिर्देशादस्वरसःसूचितः।सचइ
व्यसाक्षात्कारेसंख्यापरिमाणसाक्षात्कारस्यापिनियमात्परिमाणसंख्यासाक्षात्कारोप्यात्मनःसंभवतीत्यादिः।इत्थंआत्मनआ
काशसमवेतगुणादीनांचमानसत्वेत ुणाश्चेतिचकारेणतत्समवेतचेत्रपर्भत्वादिजातीनांतदभावानांचसंग्रहः।परात्मगुणानां
गुणादीनांपरस्यायोग्यत्वात्।परमाणुमात्रविषयत्वात्।चक्षुरयोग्यत्वात्।चाक्षुषज्ञाना विषयत्वात्।वत्समाणचाक्षुषसामग्र्यभा
वेनचाक्षुषाविषयत्वादितियावत्।चक्षुरादियोग्यद्रव्यानपेक्षतिकिमितिचक्षुरादीनामित्यर्थः।तेनाप्रष्टत्वगिंद्रियादौयोग्यताने

कु२

वे२

री२

भावा३ रूप२ तु१ त्व३

नार्थांतरमितिध्येयं।महदइति।तथाचद्रव्यचाक्षुषत्वावच्छिन्नंप्रति।महत्त्वेनउद्भूतत्वेनचहेतुत्वादित्यर्थः।तथाचपरमाणोश्चाक्षुषंप्रति
न्नटत्वकारणमहत्त्वबाधादेवनातिप्रसंगइत्याहपरमाण्विति।चाक्षुषत्वावच्छिन्नंप्रतिउद्भूतरूपस्यहेतुत्वेमानमाह।आत्मादय
इति।तथाचात्मनिउद्भूतरूपाभावात्आत्मानचाक्षुषइतिभावः।ननुतथापिरूपवत्त्वेनैवचाक्षुषत्वावच्छिन्नंप्रतिहेतुत्वोक्तादेर्वायोश्चाक्षुषव
रो।अत्ररूपेकारणतावच्छेदकतयाउद्भूतत्वप्रवेशनेत्यतआह।पिशाचादयइति।जातिविशेषइति।स्वपरप्रकाशतावच्छेदको
जातिविशेषइत्यर्थः।एकइत्यनेनास्वरसःसूचितः।सचशुक्लत्वादिजातिसांकर्यरूपः।अथशुक्लत्वादिव्याप्यंनानैवोद्भूतत्व
इतिचेत्न।तदाद्रव्यचाक्षुषत्वावच्छिन्नंप्रतिअननुगतानामुद्भूतरूपाणांकारणत्वासंभवादितिध्येयं।अनुद्भूतत्वेति।नीलत्वशु
क्लत्वव्याप्यतत्तदुद्भूतत्वाभावकूटवत्त्वमनुद्भूतत्वंअथवातत्तत्शुक्लादिचाक्षुषप्रतिबंधकतावच्छेदकतयासिद्धनानानुद्भूतत्व

रूपे२

तन२

जस्यभावच्छटवत्त्वंउद्भूतत्वमितिविनिगमनाविरहोऽस्वरसः अपरेत्यनेनसूचितः उद्भूतरूपंसाक्षात्कारेमीत्यनुभवसाक्षिकोविष
यताविशेषोरूपनिष्ठोद्भूतत्वं।सच्चघटादिसमवेतगुणादिनिष्ठोनपिशाचादिरूपनिष्ठइतितदुक्तमाभातीतितत्त्वाचक्षुर्ग्राह्यगुणा
नाहयोग्यगुणाइतिचक्षुर्योग्यगुणाइत्यर्थः।योग्यद्रव्यंचाक्षुषद्रव्यं।तन्मात्रवृत्तिसंख्येत्युक्तमात्रपदफलमाह।मात्रपदंचेति।
घटाकाशसंयोगस्याकाशवृत्तित्वात्तन्मात्रवृत्तित्वमित्यर्थः।इदानींत्वगिंद्रिययोग्यानद्रव्यादीनाह।त्वचइतित्वचद्रव्यप्रत्य
क्षंप्रतिमहदुद्भूतस्पर्शवत्त्वेनकारणतायोक्रमेणमहत्त्वपदादेःफलमाह।तेनेति।विषयत्रि।परमाणोर्वेति।परमाणोर्नमहत्त्वं।
वायोर्नोद्भूतरूपंपरमाणोर्नोद्भूतस्पर्शइत्यर्थः।त्वचोयोग्यगुणानाह।गुणाश्चेति।चक्षुषोयोग्यत्वेत्वचोयोग्यइतिशेषः।महदुद्भूतस्पर्शश्च
महत्त्वसामानाधिकरण्योद्भूतस्पर्शइत्यर्थः।त्वचोयोग्यइतिशेषः।अतएवचक्षुर्योग्यत्वविशेषणादेवानन्वेवंचक्षुर्योग्यगुणारूपा

रूप२ त्वचोयोग्य२ रि२

त्वक्रूयोग्यसमवेत ३

त्र

तिरिक्ताश्चैत्त्वचोयोग्यास्तदालोकपरिमाणादृश्यस्यचाद्दृष्टत्वमित्यत आह।नचेति उद्भूतस्पर्शवद्वृत्तित्वादिति।तथाचरूपातिरिक्ताश्च त्व
चोयोग्या उद्भूतस्पर्शवन्मात्रवृत्तयस्तुचोयोग्या इति भावः।कर्म्मचेति।योग्यसमवेतत्वेकयोग्यसमवेतत्वचोयोग्यमितिशेषः।योग्यव
क्तगतंत्वचोयोग्यमितिशेषः।अत एवालोकगतकर्म्मणः।ज्ञानत्वादिजातेश्चनत्वक्योग्यत्वमितिध्येयं।समवाय इति त्वचोयोग्य
इत्यर्थः।मीमांसकास्त्विति।लाघवात्द्रव्यस्पार्शनकारणतायांउद्भूतरूपाप्रवेशाल्लाघवादित्यर्थः।तथाचतेषांमतेद्रव्यस्पार्शनंप्र
तिउद्भूतस्पर्शत्वेनैवकारणतेत्यर्थः।लाघवाद्द्रव्यचाक्षुषत्वेति।तथाचबहिरिंद्रियजन्यद्रव्यसाक्षात्कारत्वापेक्षयाद्रव्यचाक्षुषत्व
४इत्यर्थः।उद्भूतस्पर्शवन्मात्रेत्यत्रमात्रपदव्यावृत्तिमाह।नवाघटप्रभासंयोगादय इति।त्वचोयोग्यतायांउद्भूतत्वस्पर्शविशेष
णफलमाह।तत्रहीति।तत्रप्रदीपप्रभायां।तथाचतत्रोद्भूतप्रभायांतथाचतत्रोद्भूतस्पर्शाभावान्नवृत्तिपरिमाणंनत्वचोयोग्य४४॥

राम
१२

स्पलघुत्वादित्पर्थः।तद्धेतुत्वात्।उद्भूतरूपस्पहेतुत्वात्।आद्धरित्पनेनास्वरसःसूचितः।सचबहिरिंद्रियजन्यद्रव्यसाक्षात्कारत्वावच्छिन्नापे
क्षयाद्रव्यचाक्षुषत्वस्पलघुत्वेपिनोद्भूतरूपत्वादिनाकारणत्वंतत्र उद्भूतत्वस्यपाकावयवजन्यतावच्छेदकजातिभ्यांसांकर्य्यात्।अत
एवद्रव्यस्पार्शनत्वावच्छिन्नंप्रतिनोद्भूतस्पर्शत्वेनापिकारणता।अत्रनव्याः।द्रव्यमानसेतरजन्यसाक्षात्कारत्वावच्छिन्नंप्रतिज
नकतावच्छेदकतया।सिद्धंतत्तद्द्रव्यगतैकत्वगतोद्भूतत्वेनैवकारणता।नचैवंकारणतावच्छेदकोद्भूतत्वजातिःपरिमाणगतैवकल्प्य
तामितिवाच्यं।महत्वादिजन्यतावच्छेदकजातिभिःसंकरात्।नापिपृथक्त्वादिगता।तस्यावधिज्ञानज्ञाप्यत्वेनविलंबोपस्थितिकत्वा
त्।तत्रवद्भूतोविवादाच्च।अतएवपरत्वापरत्वगता।ततश्चान्यस्यापिद्रव्यस्योपगमात्।एकत्वपरत्वापरत्वद्व्यसांमत्वेनतावत्सुतज्जा
तिकल्पनेगौरवाच्चनापिस्थितिस्थापकगता।तस्यातींद्रियत्वेनविलंबोपस्थितिकत्वात्।पृथिव्यामेवकेश्चित्तत्स्वीकारात्।जल

दिजन्यतावच्छेदक

दिवहिर्द्रव्ये तत्सत्त्वे वह्नेर्न्नो विवादाद्या नवावेग विभागगतावह्नेषु तत्तत्कल्पने गौरवात्। अन्यतरकर्म्मोभयकर्म्मणोर्जातिभ्यां संकराद्वा। अत
एव न संयोगगता। एकत्रवह्निषु संयोगेषु तत्तत्कल्पने गौरवाद्वा। नापि कर्म्मगता नोदनादिजन्यतावच्छेदकजातिभिः संकरात्। निष्क्रिय
स्यापि द्रव्यस्योपगमात्। एकत्रवह्नीनां कर्म्मणां तत्कल्पने गौरवाद्वा। इत्थं च वास्त्वेकत्वेन सा जातिः कल्प्यत इति न स्पार्शनो वायुः। न चैवं
प्रभापि न चाक्षुषी स्यात् तद्देकात्वस्य तादृशजातिरहितत्वात्। अन्यथा तस्या अपि स्पर्शनापत्तेरिति वाच्यं। कार्य्यतावच्छेदकावच्छिन्नं
हि तत्र जायत एव स्पार्शनत्वचाक्षुषत्वादिविशेषधर्म्मावच्छिन्ने तत्स्पर्शविशेषरूपविशेषस्यैव नियामकत्वात्। यद्विषमानसेतरत्ववि
शिष्टजन्यद्रव्यसाक्षात्कारत्वेन जन्यद्रव्यसाक्षात्कारत्वविशिष्टमानसेतरत्वादिनावा जन्यत्वमित्यत्र विनिगमकाभावः संभाव्यते तदा सां
द्रव्यचाक्षुषत्वस्पार्शनत्व एव तादृशैकत्वजन्यतावच्छेदके लाघवात्। तथापि न षष्ठ्यक्षो वायुरित्यन्यत्र विस्तरः। इत्याद्भः। समवायातीन्द्रि

यत्ववादिनांमतं दूषयितुमुपन्यस्यति वैशेषिकाक्षसमवायेतिन प्रत्यक्षो नेंद्रियमात्रजन्यप्रत्यक्षविषय इत्यर्थः॥नचसमवाय
स्येति।तथाचसमवायस्यैकत्वात्तस्यचपरमाणुसाधारण्यादितिभावः॥तथाहेतुतायामितिसंबंधप्रत्यक्षे प्रतियावदाश्रयप्रत्य
क्षेण हेतुतायां मानाभावादिति।तद्धर्मावच्छेदेन तस्यान्वयव्यतिरेकाभावादित्यर्थः॥ननुयोग्यमात्रसमवेतगुणत्वेनयोगात्वेवा
युस्पर्शेपिस्पार्शनोनस्यादत आह।किंचेति।गौरवादिति।संबंधप्रत्यक्षस्यगुरुत्वेनकार्य्यतानवच्छेदकत्वात्।लाघवात्संयोगप्र
त्यक्षत्वमेवकार्य्यतावच्छेदकं तत्प्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वादितिभावः॥घ्राणेंद्रिययोग्यानवक्त्याह।घ्राणयोग्य इति
।भूतएव उद्भूतगंधे महत्वसामानाधिकरण्यविशेषणदेवागंधे उद्भूतत्वविशेषणफलमाहानवेति।रसनयोग्यगुणानाह।रस
नयोग्य इति।तेन रसे महत्वसामानाधिकरण्यविशेषणेन रसे उद्भूतत्वस्याविशेषणत्वात्शङ्कितमाहानवेति।श्रवणयोग्यगुणादीना

हाश्रवणायोग्य इति। तन्न्तायातिशरद्गनायातिसंक्षेप इति। द्रव्याग्राहकं घ्राणरसनश्रवणमिव यत्त्वनुपलब्ध्याख्यं अभावग्राहकमप्यतिरि
क्तं परेषां प्रमाणमस्ति तन्न्वनिस्तारभियात्रोद्दृक्यातिखंडितमित्यादिसंक्षेपार्थः। प्रसंगात्सन्निकर्षान्निरूपयितुं प्रणालीमाह तत्स
चेति। शब्देतरेति। उपलक्षणं चैतत् अयोग्यत्वेनापि जातिर्विशेषणीया नातो गुरुत्वत्वभावनात्वग्रहः। कर्मगता जातिरित्युपलक्षणं।
जन्यघटादिद्रव्यगतघटादिजाते रूपि चक्षुःसंयुक्तकपालसमवेतघटसमवेतत्वेन ग्रहसंभवात्। विशेषणतयेति। भावाभाव
साधारणी व्यतिरिक्तैव विशेषणतेति भावः। इंद्रियविशेषणतेति। इंद्रिये विशेषणतेति सप्तमीसमासः। इदमेव दर्शयति। इंद्रि
यरूपे श्रवणेति। नन्वित्ति न प्रत्यासत्तिः इंद्रियेण द्रव्यग्रहे न सन्निकर्ष इत्यर्थः। इदमेव स्फुटयति संयुक्तेति इंद्रियसंयुक्तेत्यर्थः। आ रा०म
त्मनीति। तथा च द्रव्यसाक्षात्कारत्वावच्छिन्नं प्रति इंद्रियसंयोगत्वेन हेतुत्वात्। संयोगस्य सन्निकर्षत्वं दुर्वारमिति भावः। संक्षेप इति। २४

भवत्वेवं संयोगः क्वचित्सन्निकर्षः तथापि चक्षुःसंयोगादीनां सन्निकर्षत्वे मानाभावात्। तथाहि द्रव्यसमवेतचाक्षुषत्वावच्छिन्नं प्रति चक्षुः
संयुक्तसमवायत्वेनैव हेतुत्वं रूपादिचाक्षुषानुरोधेनावश्यं वाच्यं तथा च तयैव प्रत्यासत्त्या घटादिद्रव्यचाक्षुषोपपत्तौ अयं घटादिद्र
व्यचाक्षुषे चक्षुःसंयोगहेतुत्वेन मानाभावात्। भवतां कपालचक्षुःसंयोगोत्तरं घटोत्पत्तिद्वितीयक्षणे घटप्रत्यक्षानङ्गीकार इव मम
पि कपालविमर्शदशायां घटचक्षुःसंयोगोत्पत्त्या घटप्रत्यक्षानङ्गीकारेपि क्षत्यभावात्। न चात्मप्रत्यक्षानुरोधात् द्रव्यसाक्षात्कारत्वा
वच्छिन्नं प्रति इन्द्रियसंयोगत्वेन हेतुत्वकल्पना चाक्षुषं प्रति चक्षुःसंयोगस्यापि हेतुत्वमावश्यकमिति मणिकृदुक्तं युक्तं इन्द्रियस्यानु
गतस्याभावेन मानाभावेन च तादृशकार्यकारणभावस्याभावात्। आत्ममानसानुरोधेन तद्विशिष्येव द्रव्यमानसत्वावच्छिन्नं प्रति आ
त्ममनोयोगत्वादिना इन्द्रियसंयोगस्य हेतुत्वात्। न च पिशाचस्य तद्रूपादेश्च चाक्षुषत्वप्रसंगः। द्रव्यसमवेतचाक्षुषं प्रति सामानाधि

करणसंबंधेनोद्भूतरूपस्यापि हेतुत्वात्तामहत्त्वेतु द्रव्यसाक्षात्कारत्वावच्छिन्नं प्रत्येव समवायेन हेतुः।द्रव्यान्यद्रव्यसमवेतसाक्षात्कारं प्रति
च सामानाधिकरण्येन हेतुरिति न द्व्यणुकस्य तद्रूपादेर्वा साक्षात्कार इति उभयमतेप्येतस्य समाधेयत्वाच्चेति द्रष्टव्यं।इत्थं च त्रसरेणुप्रत्य
क्षानुरोधात् द्व्यणुकसिद्धिरप्यावश्यकीति मंतव्यं।न चैवं परमाणुघटितसन्निकर्षेण द्रव्यत्वसत्वादीनां चक्षुषा प्रतीतिः घटादिमादाय सा
मानाधिकरण्येनोद्भूतरूपमहत्वादीनां तत्र सत्वादिति वाच्यं।जातिचाक्षुषत्वावच्छिन्नं प्रति समवेतमड्डिक्षचाक्षुषत्वावच्छिन्नं प्रति
वा चाक्षुषत्वेन कारणता आश्रये चाक्षुषस्य तत्र कार्यं दिशि विषयत्वं संबंधः कारणादिशि च स्वविषयसमवेतत्वं संबंध इति नाश्रय
चीक्षुषं।आश्रयनिर्विकल्पकानंतरमेव च जातिनिर्विकल्पकांगीकारात् उभयसमाधेयत्वाच्चेत्यलं चक्षुःसंयोगस्य कारणत्वेन निसंदे
पार्थ इति नव्याः।तत्र ऋजुवक्रद्रव्यचाक्षुषत्वावच्छिन्नं प्रति लाघवात् चक्षुःसंयोगत्वेन हेतुत्वं।न तु द्रव्यतत्समवेतसाधारणं चक्षुःसंयु

क्तसमवायस्यहेतुत्वात्तथासतिमहत्तांपरमाणुघटितसन्निकर्षेणपृथिवीत्वादिप्रत्यक्षकारणायजातिचाक्षुषत्वावच्छिन्नंप्रतिआश्रय
चाक्षुषत्वेनहेतुत्वकल्पनेद्रव्यसमवेतचाक्षुषंप्रतिउद्भूतरूपवत्त्वेनद्रव्यान्यद्रव्यसमवेतसाक्षात्कारत्वावच्छिन्नंप्रतिचमहत्त्वेनसामा
नाधिकरण्यप्रत्यासत्त्याहेतुत्वंवाच्यमितिकार्य्यतावच्छेदकधर्म्मस्यजनकतावच्छेदकसंबंधस्यगौरवंदुःस्परिहरं।ममतुपरिमाणु
घटितसन्निकर्षेणपृथिवीत्वादिप्रत्यक्षजातिप्रसंगवारणायद्रव्यान्यद्रव्यसमवेतचाक्षुषत्वावच्छिन्नंप्रतिआश्रयचाक्षुषत्वेनजा
तिचाक्षुषंप्रतिहेतुःहेतुद्रव्यचाक्षुषंप्रतिउद्भूतरूपत्वेनद्रव्यसाक्षात्कारत्वावच्छिन्नंप्रतिआश्रयचाक्षुषत्वेनजातिचाक्षुषंप्रति
हेतुःहेतुद्रव्यचाक्षुषंप्रतिउद्भूतरूपत्वेनद्रव्यसाक्षात्कारत्वावच्छिन्नंप्रतिमहत्त्वेनहेतुत्वमिति।कार्य्यतावच्छेदकधर्म्मसंबंधयो
र्लाघवमिति।जातिचाक्षुषत्वावच्छिन्नंप्रत्याश्रयचाक्षुषस्यहेतुत्वांगीकारेद्रव्यचाक्षुषंप्रतिनसंयुक्तसमवायेनहेतुतायांपर्य्य

वस्यति।किंतुचक्षुःसंयोगस्यैवेष्याङ्गः।वक्ष्यतोमहत्त्वकार्यतायांद्रव्यान्यत्वमपिनविशेष्यंत्रुटावेवविश्रामादिति।किंतुद्विमादायातिप्रसं
गवारणायद्रव्यान्यत्वेनेति।नत्वं।प्रसंगात्तचक्षुःसंयुक्तसमवायचक्षुःसंयुक्तसमवाययोर्हेतुत्वंप्रत्यक्षेनिरस्यतितन्नयथाहिद्रव्यलौकि
कचाक्षुषंप्रतिचक्षुःसंयोगएवसन्निकर्षस्तथाकिंद्रव्यान्यद्रव्यसमवेतसमवेतयोर्लौकिकचाक्षुषंप्रतिचक्षुःसंयुक्तमहदुद्भूतरूप
वत्समवायचक्षुःसंयुक्तमहदुद्भूतरूपवत्समवायचक्षुःसंयुक्तमहदुद्भूतरूपवत्समवेतसमवाययोःसन्निकर्षत्वेनानवविनि
गमनाविरहःद्रव्यचाक्षुषानुरोधेनउक्तलाघवेनचचक्षुःसंयोगस्यहेतुत्वावश्यकत्वात्।नचैवंनिमीलितनयनस्यगुणादितत्सम
वेतजात्योश्चाक्षुषापत्तिरितिवाच्यं।द्रव्याविषयकगुणादिचाक्षुषस्यालीकतयाद्रव्यचाक्षुषसामग्रीविरहादेवतदापत्तिविरहादि राम
ति।अत्रसांप्रदायिकाः।चक्षुःसंयुक्तमहदुद्भूतरूपवत्समवायस्यासन्निकर्षत्वेचक्षुःसंयुक्तघटादेश्चाक्षुषोत्पाददशायांघटादिगुण १६

कर्म्मजातिष्विव चाप्रत्यासन्निकृष्टपटादिगुणकर्म्मजातिष्वपि लौकिकविषयितासंबंधेन चाक्षुषापत्तेर्दुर्वारत्वात् । न चाश्रयाविषयकगुणादि
चाक्षुषस्यालीकतया तत्र पटप्रत्यक्षसामग्र्यविरहात् न तद्वृत्तिगुणादेश्चाक्षुषमिति वाच्यं । तावता पटवृत्तिगुणचाक्षुषत्वेनापत्त्यसंभवे
ऽपि पटवृत्तिगुणादौ लौकिकविषयतया चाक्षुषसामान्यापत्तेर्दुर्वारत्वात् । पटाविषयकस्यापि चाक्षुषस्य सुप्रसिद्धत्वात् । एवं चक्षुः
संयुक्तमहदुद्भूतरूपवत्समवेतसमवायस्यासन्निकर्षत्वेऽपि चक्षुःसंयुक्तघटादेश्चाक्षुषोत्पत्तिदशायां असन्निकृष्टद्रव्यवृत्तिगुण
ादिमात्रसमवेतजातौ परमाण्वादिवृत्तिगुणमात्रसमवेतजातौ च लौकिकविषयतया चाक्षुषोत्पादो दुर्वार इति सिद्धान्तानुयायिनः ।
उक्तालौकिकजातिलौकिकचाक्षुषं प्रति स्वविषयसमवेतत्वसंबंधेनाश्रयलौकिकचाक्षुषमेव हेतुः लाघवात् । इति नासन्निकृष्टपटगु
णादिमात्रसमवेतजातिचाक्षुषं न तद्द्रव्यान्यद्रव्यसमवेतसमवेतयोर्लौकिकचाक्षुषं प्रति चक्षुःसंयुक्तमहदुद्भूतरूपवत्समवेतसम

वायये॥सन्निकर्षयोर्हेतुत्वात्तच्चतयोर्हेतुत्वेतद्दलेनद्रव्येपिद्रव्यान्यद्रव्यसमवेतविषयकचाक्षुषापत्तिवारणायद्रव्यान्यविषयकसाक्षात्का
रंप्रतिद्रव्यभेदस्यहेतुत्वावश्यकत्वेन।एवंद्रव्यतन्मात्रसमवेतजातिष्वपिद्रव्यान्यद्रव्यसमवेतसमवेतविषयकचाक्षुषापत्तिवारणा
यद्रव्यान्यद्रव्यसमवेतसमवेतविषयकप्रत्यक्षंप्रतिसमवेतत्वसंबंधेनद्रव्यान्यस्यचहेतुत्वावश्यकत्वेनचकार्यकारणभावचतु
ष्टयकल्पनापत्तेः।एवंगुरुत्वस्थितिस्थापकत्वत्वरसत्वगंधत्वस्पर्शत्वानांतद्व्याप्यजातीनांचचाक्षुषापत्तिवारणायसमवेतत्व
विशिष्टलौकिकविषयतासंबंधेनचाक्षुषोत्पत्तिंप्रतितादात्म्यसंबंधेनगुरुत्वान्यसमवेतत्वस्थितिस्थापकान्यसमवेतत्वगंधान्य
समवेतत्वस्पर्शान्यसमवेतत्वादिनाकार्यकारणभावपंचकांतरकल्पनापत्तेश्च।जातिचाक्षुषं।प्रतिआश्रयचाक्षुषहेतुत्वेचआश्रय राम
चाक्षुषभावादेवनैतेषांचाक्षुषापत्तिः।केवलव्यक्तिविषयकनिर्विकल्पकानंतरमेवजातिनिर्विकल्पकंततोजातिविशिष्टप्रत्यक्षं १७

त्यस्तुपगमात्रानाश्रयचाक्षुषस्यजातिचाक्षुषेव्यभिचारः।नचतथापिचक्षुःसंयुक्तघटादेश्चाक्षुषोत्पाददशायांअसन्निकृष्टपटादिवृ
त्तिगुणकर्म्मस्वपिलौकिकविषयतासंबंधेनचाक्षुषोत्पत्तिवारणायचक्षुःसंयुक्तमहदुद्भूतरूपवत्समवायलक्षणसन्निकर्षस्यका
रणत्वमावश्यकमितिवाच्यं।आसज्यवृत्तिगुणचाक्षुषंप्रतिस्वाश्रयसमवेतत्वसंबंधेनचक्षुःसंयोगाभावस्यप्रतिबंधकत्वमावश्य
कं।तस्यप्रतिबध्यतावच्छेदकंनगुणचाक्षुषत्वंव्यासज्यवृत्तिगुणचाक्षुषत्वंकिंतुगुणकर्म्मचाक्षुषसाधारणंद्रव्यान्यसत्त्वाक्षुषत
मेवयावदाश्रयचक्षुःसंयोगंविनापिद्रव्यस्यद्रव्यत्वादिजातेश्चचाक्षुषोदयान्नद्वहिर्भावः।द्रव्यान्यसत्त्वंचप्रतिबध्यतावच्छेदकत
याप्रसिद्धोगुणकर्म्मवृत्तिजातिविशेषः।नचैवंद्रव्यान्यसत्त्वाक्षुषत्वस्यलौकिकविषयतासंबंधेनअतीतानागतगुणकर्म्मणिद्रव्य
द्रव्यत्वजातौचस्यात्।निरुक्तप्रतिबंधकाभावस्याविशिष्टत्वादितिवाच्यं।द्रव्यान्यसत्त्वस्यकंप्रतितादात्म्यसंबंधेनद्रव्यान्यत्वेनापिका

रणत्वात्। मवन्तां गुणचाक्षुषत्वादेः प्रतिबध्यतावच्छेदकत्वेपि निरुक्तप्रतिबंधकाभाववत्वेन द्रव्यादौ गुणचाक्षुषापत्तिवारणाय गुण
चाक्षुषादिकं प्रति गुणत्वादिना कारणत्वावश्यकत्वेन तत्तुल्यत्वात्। एवं निरुक्तप्रतिबंधककाले द्वित्वादौ द्रव्यान्यसत्वाक्षुषोत्पत्त्यसं
भवेपि चाक्षुषसामान्यस्य जातिविषयतया प्रसिद्धस्य वारणाय जातिचाक्षुषं प्रति जातित्वेनापि कारणत्वात्। तत्र गुणादिचाक्षु
षस्य प्रतिबध्यतावच्छेदकत्वेपि संयोगद्वित्वादौ चाक्षुषसामान्यस्य गुणान्यद्रव्यविषयकस्य वारणाय गुणादिभिन्नविषयकचा
क्षुषं प्रति गुणादिभेदस्य कारणस्यावश्यकत्वेन तत्तुल्यत्वात्। न चैवं चक्षुःसंयुक्तत्वमहदुद्भूतरूपवत्समवायस्य सन्निकर्षत्वे चक्षुःसं
युक्तपरमाणौ पिशाचादेर्गुणकर्मणोश्चाक्षुषापत्तिर्निरुक्तप्रतिबंधकाभावसत्त्वादिति वाच्यं। जातिचाक्षुषं प्रति स्वविषयसमवेतत्व राम
संबंधेन यदाश्रयचाक्षुषस्य कारणत्वेनैतस्यैव कार्यतावच्छेदकं न जातिचाक्षुषत्वं किंतु द्रव्यान्यसमवेतचाक्षुषत्वमतः परमाण्वादिगुण १८

कर्म्मणो र्नचाक्षुषापत्तिः।जातिचाक्षुषवत्तद्रूपादीनांकर्म्मणांचचाक्षुषमपिना।अथचाक्षुषंविनायद्वाय्यासज्यवृत्तिगुणचाक्षुषं
प्रतिस्या।अथसमवेतत्वसंबंधेना।अथचाक्षुषाभावस्यप्रतिबंधकमावश्यकंतस्यैवप्रतिबध्यतावच्छेदकंनद्व्यासज्यवृत्तिगुणचा
क्षुषत्वंअपितुसामान्यतोद्रव्यान्यसत्त्वाक्षुषत्वमपिनपरमाणुसमवेतगुणकर्म्मणांचाक्षुषापत्तिः।नचस्वनाशकालीनचक्षुः
संयोगजन्या।अथचाक्षुषेसतिपटादिभिन्नेद्रव्येचक्षुःसंयोगेविद्यमानेजातिचाक्षुषवारणमथचक्षुःसंयुक्तसमवायस्यसन्नि
कर्षत्वमावश्यकमितिवाच्यं।तदानीताद्दृशजातिचाक्षुषस्येष्टत्वात्तद्व्यचाक्षुषंप्रतिचक्षुःसंयोगस्यजातिचाक्षुषंप्रतिआश्र
यचाक्षुषस्यचकार्य्यसहवर्त्तित्वेनहेतुत्वाभ्युपगमादपितद्वारणसंभवाच्चेत्फलंचक्षुःसंयुक्तसमवायचक्षुःसंयुक्तसमवेतसमवा
ययोःहेतुत्वगवेषणेनेतिदिक्।स्यादेतदिति।परमाणोमहत्वंनास्तीतिप्रत्ययात्।परमाणोचक्षुःसंयोगस्यैवअत्रघटेआलोकोन

स्तीति प्रत्ययात्। अंधकारस्थघटे आलोकाभावग्रहात्तदोषात्। चक्षुःसंयुक्तविशेषणतावटकत्वेन चक्षुःसंयोगोंऽधकारस्थघटेप्यस्तीति भा
वः। चक्षुषाऽद्यग्रह इति। आलोकपरमाणुसंयोगात्राव्यक्तमित्यालोके महत्वविशेषणं। अनुद्भूतरूपवतेप्यालोकस्य चक्षुरादिरूपस
संयोगस्य सत्वेपि नाव्यक्तमिति। उद्भूतरूपवत्वं आलोकविशेषणमित्यर्थः। सोपि महदुद्भूतरूपालोकसंयोगो। क्वाशंकते प्रदीप इति।
दृष्टयतिमणौ। तत्र भावात्। तेजोंतरसंयोगाभावात्। प्रभाप्रत्यन्तेष्वभांतरसंयोगस्याहेतुत्वे मानमाह। द्रव्यते चेति। पुनः शंकते
अथेति। स्ववर्णेति। आलोकत्वं स्ववर्णत्वादिव्यापकमिति भावः। नन्वित्यादिना पाकशंकते समाधानमाह। अत्रोच्यत इति। आलोकाका
शसंयोगस्येति। तथा चालोके वृत्तिसंयोगत्वेन कारणता। आलोकसंयोगस्येति भावः। नचैवमिति। स्ववर्णस्याप्यालोकत्वमिति भावः। अ राम
नभिभूतेति। रूपे उद्भूतत्वस्येव अनभिभूतत्वस्यापि विशेषणत्वादुद्भूतानभिभूतत्वस्यापि विशेषणत्वादुद्भूतानभिभूतरूपवन्महदालो १८

कसंयोगत्वेन हेतुत्वादिति भावः। द्रव्यांतरेति। अंधकारस्य घटसुवर्णसंयोगेन द्रव्यग्रहापत्तेरित्यर्थः। सुवर्णभिन्नमिति। सुवर्णेतरतेजो
भिन्नद्रव्यं सुवर्णं तेजोभिन्नद्रव्यं चेति द्रव्यांतरग्रह आलोकसंयोग इव सुवर्णग्रहेप्यालोकापेक्षेति भावः। अत्र संप्रदायविद इत्यने
नकार्य्यतावच्छेदकगौरवमेवास्वरसः सूचितः। न चाक्षुआलोकसंयोगस्य लाघवात् महाप्रभाप्रत्यक्षे प्रभावृत्तिसंयोगेनैव कारणता
तान तु उद्भूतानतिद्भूतरूपस्य हदालोकसंयोगत्वेन गौरवात्। प्रभाद्वर्णसुवर्णादिव्यावृत्तिर्जातिविशेषः। इति नांधकारे सुवर्णा
चाक्षुषप्रमाप्रत्यक्षप्रभाचक्षुःसंयोगेनैव प्रभावृत्तिसंयोगकारणतानिर्वाहादिति भावः। न चैवं तादृशआलोकसंयोगावच्छेद
कानवच्छिन्नचक्षुःसंयोगे विद्यमानेपि न घटादेः प्रत्यक्षमित्याशंकते। तथापीति। परस्यापरदिगवच्छेदेन। तदसंयुक्तस्य आलोकासंयु
क्तस्य। परदिगवस्थितपुरुषे परदिगवच्छेदेन चक्षुःसंयुक्तेनेति शेषः। यदवच्छेदेनेति। तथा चालोकसंयोगावच्छेदकावच्छिन्नचक्षुःसं

योगत्वेनहेतुत्वंवृत्तयोःसमानदेशताविरोधश्चनिबिडयोरेवेत्यतोःनदोषः।किंवोभयोरेकमात्रसंबंधेननविरोधः॥किंतुवृत्तिनियाम
कसंबंधेनवृत्तावेवेतिध्येयमितिभावः।नचेदमालोकसंयोगस्यकारणतावच्छेदकत्वाकारणत्वाद्युपपत्तिरितिवाच्यं।आलोकसंयोगा
वच्छिन्नचक्षुःसंयोगस्यैवविशिष्टस्यकाभावेनचक्षुःसंयोगावच्छिन्नालोकसंयोगत्वेनापिहेतुत्वेनद्वयोर्हेतुत्वसंभवात्।आलोकादिसं
योगावच्छिन्नत्वंतुस्वरूपसंबंधविशेषइतिध्येयं।अत्रकेचित्तार्चक्षुषत्वावच्छिन्नंप्रतिआलोकसंयोगत्वेनहेतुत्वंविनालोकसंयोगंत
मसिविडालादेःसांजनचौरादेश्चद्रव्यचाक्षुषोदयात्।नचविडालादिचक्षुष्येवआलोकांतरमस्तीतिचक्षुःसंयोगदशायांआलोक
संयोगस्यापिसंभवात्इतिवाच्यं।तथासत्यंधकारेविडालादेरिवनिरंजनपुंसोपिद्रव्यचाक्षुषापत्तेः।विडालचक्षुःसंयोगसांजनपुरु राम
षचक्षुःसंयोगादेवआलोकसंयोगस्यापिनिर्वाहात्।नचविडालादीनांअंधकारेद्रव्यचाक्षुषादिदशायांपुरुषांतरस्यतद्द्रव्येचक्षुःसं २०

योगेमानाभावादितिवाच्यं।तद्व्यक्तेअंधकारप्रत्ययानुरोधेनचक्षुःसंयुक्तविशेषणतानिर्वाहायावश्यंचक्षुःसंयोगोऽस्तीत्यावेदितंप्रागेवेत्या
हुः।तत्रतत्तन्मानुषीयद्रव्यचाक्षुषत्वावच्छिन्नंप्रत्येवआलोकसंयोगस्यहेतुत्वात्इतिसंप्रदायः।नव्यास्तुमानुषीयविजातीयचाक्षुष
त्वावच्छिन्नंप्रतिआलोकसंयोगत्वेनएवंविजातीयमानुषत्वावच्छिन्नंप्रतिअंजनसंयोगत्वेनकारणतावैजात्यंआलोकसंयोगादि
जन्यतावच्छेदकंचाक्षुषत्वव्याप्यंयद्वामानुषीयद्रव्यचाक्षुषत्वावच्छिन्नंप्रतिअंजनाभावविशिष्टालोकसंयोगाभावत्वेनप्रतिबंध
कत्वात्तदभाववत्वेनैवकारणता।अंजनाभाववैशिष्ट्यंआलोकसंयोगाभावेअंजनसंयोगेचक्षुःसंयोगित्वसंबंधावच्छिन्नप्रतियो
गिताकाभावीयविशेषणतावत्वविशेषणत्वरूपंसामानाधिकरण्यंसचविशिष्टाभावःसत्यालोकसंयोगेअंजनसंयोगेचेतिना
नालोकसंयोगस्यालोकसंयोगत्वेनहेतुताकिंतूक्तरूपेणेतिप्राहुः।स्यादेतदिति।विशेषणताप्रत्यासत्तिःसन्निकृष्टार्थग्रहणनि

सि·टी
२२

यमादेवसत्त्वसंनिकृष्टार्थेसमवायाभावेमानाभावात्।नसंभवतीतिविशेषणताभानप्रत्यासत्तिरितिभावः॥समवायेमानमाह॥अयंघटइ
तितथाचईदृशविशिष्टानुभवेविशेषणताविशेष्यसंबंधस्यापिविषयीकरणात्तत्सबंधेनइतरसंबंधबाधात्समवायएवेतिभावः॥
नन्वितरसंबंधबाधएवासिद्धइतीतरसंबंधेनैवायंविशिष्टप्रत्ययइत्यतआह।नहीति।दूषयति।स्वरूपेति।तथाचस्वरूपसंबंधएव
घटत्वरूपबलनाद्याधाराधेयभावनियामकोस्तुकिंसमवायेनेतिभावः॥नहीति॥तथाचसमवायस्यैवआधारतात्वेपटेपिघटत्व
विशिष्टबुद्ध्यापत्तिरितिभावः॥इदमेवविघटयति।एकएवहीति।समवायाभावेसाधयति।भेदमित्यादि।घटेघटत्वमिति।तथाचस
मवायाकारानुगतमतेरेवसमवायेप्रमाणत्वात्।अत्रनयाः॥इदमापाततस्तावत्साधारणसमवायत्वेकेनानुगतमतेःसंभवात्तावक्कृत राम
क्लृप्तलाघवात्समवायसिद्धिः।तथाहिविलक्षणाविलक्षणाचित्रत्वावच्छिन्नंप्रतिनीलत्वेनपीतत्वेनशुक्लत्वेनकृष्णत्वेनकारणतासर्वचि २१

त्तसाधारणव्यापकचित्रत्वं तत्प्रतिबंधकतावच्छेदकतयैव सिद्ध्यति। अन्यथा ततत्चित्रोत्पत्तिकालेनीलत्वेनापि कार्य्यकारणाभावात्। नी
लसामग्र्या विद्यमानत्वात् चित्रोत्पत्तिकालेनीलादेवप्युत्पत्त्यापत्तेः कार्य्यसहवर्त्तित्वेन चित्रत्वेनैव प्रतिबंधकत्वात् तत्प्रतिबंधकता
वच्छेदकतया सर्व्वचित्रसाधारणव्यापकचित्रत्वजातिसिद्धिः। एवं च तत्प्रतिवध्यतावच्छेदकं चित्रेतररूपवत्त्वं तत्र एकः समवायप
वप्रतिवध्यतावच्छेदकः संबंधोस्तीति कल्प्यते। लाघवादन्यथा नीलादीनां स्वरूपसंबंधस्य प्रतिवध्यतावच्छेदकसंबंधेनंत प्राति
वध्यप्रतिबंधकभावापत्तेरिति तत्त्वमित्याहुः। अभावेप्रमाणमाह नन्वेति। असतु अप्रामाणिकइत्यर्थः। घटेनास्तीति तथा च नास्तीति
किं तु प्रतीतिविषयतया अतिरिक्ताभावसिद्धिरित्यर्थः। ननु स्वभावो भवतु प्रतीतिसिद्धतया प्रामाणिकस्तथापि तस्य घटपदार्थाति
रिक्तत्वेमानाभावादित्याशंकते। अत्र प्राभाकरा इति। अधिकः घटपदार्थाधिकइत्यर्थः। अत्र शंकते नन्वित्यादिनाइदं अभावप्र|त।

सि·टी·
१२

ति विषयीभूतं अभावेन अतिरिक्ताभावेनेत्यर्थः। शंकां निरस्यति यद्वेति। अभावो अभावाधिकरणेत्यर्थः। स च भूतले घटसत्त्वापि कदाचिद्घटाभाव
स्य सत्त्वात्। यथाश्रुतासंगतेः प्रागभावं दूषयति अत्रोच्यत इति। भूतले भूतलमिति। तथा चाभेदे आधाराधेयभावबाधादित्यर्थः। ननु माऽस्तु एकधर्मावच्छि
न्नाधाराधेयभावो अभेदे तथा च भूतलत्वावच्छिन्नाधारता च माऽस्तु। किंतु तस्यैकस्यैव भूतलस्य भूतलत्वावच्छिन्नाधिकरणता अभावत्वेन वाधे
यता च स्यात्। अपि चाभेदेप्याधाराधेयभावो घटाभावे घटो नास्तीति प्रत्ययानुरोधीत्ति कल्प्यते इह तु भूतले भूतलमित्यनुभवाभावान्नाधारा
धेयभावो भूतलत्वेनेत्यत आह। किंचेति। आद्येतद्भूतलस्य घटाभावत्वे। इदानीमिहेति शेषः। नन्वतिरिक्ताभाववादिमतेपि तस्मिन् भूतले घ
टे आनीते घटाभावो न गच्छति न वा नश्यतीति कथं न तत्र घटाभावप्रत्यय इति अत्र तत्राधिकरणातातिरिक्ताभावोत्पादविनाशशालिनी राम
ति न घटवति घटाभावप्रत्यय इति चेत्तत्राह तत एवात्र नः शरणमित्यत आह। किंच कपाल इति। सर्वदेति कपालकालमात्रे इत्यर्थः। अन्यथा क १२

पालनाशकालेकपालासत्त्वेन सर्वदैत्यस्यानर्थक्यापत्तेरितिभावः। अन्यथा कपालासत्त्वे न तत्राप्यत्यन्ताभावस्थलोक्तैव गतिः। अधिकरणनाशोत्पा
दविनाशशालिन्याः संभवेनैव दोषपरिहारसंभवादत आह किंचेति। तथा च साध्यतेति। एवं च तदर्थं ध्यानधारणासमाधिकृतेः। एवं कोपि नानुभवे
दितिभावः। संदेहप इति। इदं चापाततः। अनतिरिक्ताभाववादिमते मोक्षाधिकरणतायाः एव साध्यत्वाद्युक्ताप्यनुपपत्तिः। महमते तु नित्यसुखा
भिव्यक्तेरेव भावरूपमोक्षत्वात् तस्य च साध्यत्वात्। स च स्वत एव साधुरित्यलं पल्लवितेन। एवमभावस्याधिकरणादतिरिक्तत्वे इष्टापत्त्यापरिह
रति। स्यादेवेति। अनवस्थां निरस्यति। केवलेति। अत्रेष्टापत्तौ दूषणमाह। भवदुक्तेति। मोक्षादेव साध्यतापत्तिदोषप्रसंगादित्यर्थः। अत्राह
रिति। घट एव नाधिकरणरूप इत्यर्थः। तत्सत्त्वे घटसत्त्वे तथा च लाघवात् घटाभावाभावो भाव इत्यर्थः। केवलाधिकरणेति। अधिकरणेत्य
र्थः। उक्तयुक्तेरिति। आधाराधेयभावानुपपत्तेः। अधिकरणाभावयोर्भेदनमते भेदादित्यर्थः। संप्रदाय इति। अत्रास्वरसः प्रतियोग्यात्मकत्वेना

सि॰टी॰ स्तीतिनिषेधप्रत्ययोनस्यात्।स्याच्चघटोऽस्तीत्येवमिति।किंचाभावोऽधिकएवप्रतियोगिसमनियतःसर्वत्रलाघवात्नन्तुप्रतियोग्यात्मकत्वंगौ
२३ रवादितिदिक्।बाधकेतिप्रमात्वेबाधकाभावादित्यर्थः।अनवस्थांप्राक्दर्शानिरस्यति।तदभावस्त्विति।अन्योन्याभावस्याधिकरणात्मक
त्वंतदनात्मकत्वंवा।तुमशक्यमित्युपन्यस्यति।स्यादेतदिति।इत्यभेदेनैतदिति।तथाचाधाराधेयभावोनप्रतीयतेतिभावः।भवदुक्तेति।अ
धिकरणात्मकत्वेआधाराधेयभावानुपपत्तिःनित्यत्वानुपपत्तिश्चेति।तथाचभेदभेदस्यानतिरिक्तत्वेआधाराधेयभावानुपपत्तिःअतिरिक्त
त्वेऽनवस्थापत्तिश्चेत्युभयतःपाशारज्जुरिति।समाधत्तेअत्राहुरिति।भेदभेदइति।अपिकारात्तद्भेदभेदोऽप्यधिकइत्यर्थः।प्रामाणिकत्वादिति
प्रमाणसिद्धत्वादित्यर्थः।वक्ष्यतेयावदनुभवसिद्धोभेदस्तावद्द्वेष्योऽप्यायातीतिभावः।नन्वनुभवागोचरमप्यायाति।नानवस्थेति।युक्तप्रत्यक्षा राम
मःसप्तेति।इयताप्रबंधेनातिरिक्ततयानिरुक्तोऽभावइत्यर्थः।तादात्म्येति।तादात्म्यस्वरूपसंबंधविशेषः।तत्संबंधावच्छिन्नाभावोऽन्योन्या २३

भावइत्यर्थः॥तदन्यइति॥अन्योन्याभावभिन्नोऽभावः संसर्गाभावइत्यर्थः॥संसर्गाभावभेदेनाह॥त्यंताभावेति॥नित्यइति॥उत्पत्तिविनाशरहितइत्य
र्थः॥विनष्टइतीति॥घटेविनष्टइतिप्रतीतिविषयत्वंघटप्रतियोगिन्यतिव्याप्तिमतउक्तमभावइति॥तथाचविनष्टइतिप्रतीतिविषयःसंस
र्गाभावोध्वंसइतिफलितं॥ध्वंसस्योत्पन्नोमानमाह॥ततःप्रागभावइति॥ध्वंसप्रागभावइत्यर्थः॥तत्प्रागभावस्यप्रतियोगिप्रागभावस्यउभयत्रेति
तथाचघटदशायांघटप्रागभावदशायांचकपालेघटोभविष्यतीतिप्रतीतिबलात्घटतत्प्रागभावयोरेवध्वंसप्रागभावत्वादितिभावः
विनाश्यभावइति॥विनाशासंसर्गाभावइत्यर्थः॥सचभविष्यतीति॥तथाचभविष्यत्यनुभवसाक्षिकोविनाशासंसर्गाभावइतिफलि
तं॥विशेषणप्रयोजनंचोक्तप्रायं॥तस्यप्रागभावस्यनध्वंसः प्रतियोगिध्वंसः॥उभयत्रेति॥प्रतियोगिकालेप्रतियोगिध्वंसकालेचेत्यर्थः॥
प्रसंगाद्व्यासज्यवृत्तिधर्मावच्छिन्नाभावंप्रमाणयितुंप्रमाणमाह॥एकमात्रवृत्तीति॥एकमात्रपर्याप्तवृत्तिकेत्यर्थः॥अन्यश्चेति॥अनेकप

सि·टी· र्य्याप्तवृत्तिकेत्यर्थः प्रसंगाद्यासज्यवृत्तिधर्म्मावच्छिन्नाभावं प्रगायितुं प्रणालीमाह। एकमात्रवृत्तीति। एकमात्रपर्य्याप्तवृत्तिकेत्यर्थः। अन्यश्चेति।
२४ अनेकपर्य्याप्तवृत्तिकेत्यर्थः। ननु व्यासज्यवृत्तिधर्मावच्छिन्नाभावे मानाभाव इत्याशंकते न चेति। अंत्ये अनेकपर्य्याप्तधर्म्मावच्छिन्नाभावे
शंकामनुभवेन निरस्यति। घटवतीति। तथा चानुभवबलादेवानेकपर्य्याप्तधर्म्मावच्छिन्नाभावः सिद्ध्यतीति भावः। तयोः प्रतियोग्यभाव
योः प्रतियोगितावच्छेदकावच्छिन्नत्वेनैवेति। तथा च द्वित्वावच्छिन्नत्वेनैव समं तद्धर्मावच्छिन्नाभावस्याविरोधः न चोभयाद्यवच्छिन्नाभावव
तिउभयत्वाद्यवच्छिन्नमितिभावः इदमेवाविघटयति न चैकइति। अत एव प्रतियोगितावच्छेदकावच्छिन्नेनैव अभावस्याविरोधादेव तथा
च विशिष्टाभावोऽप्यतिरिक्तः सिद्ध्यतीतिभावः। प्रसंगादभावग्राहकं मानान्तरं मीमांसकोक्तं निराचष्टुमुपक्रमते भट्टस्त्विति। क्लृप्तेति। सं राम
योगसंयुक्तसमवायादीनां पंचानामित्यर्थः। किंत्वनुपलब्धीति। तथा च तादृशप्रमाजन्येऽज्ञानेन सन्निकर्षोऽपेक्षेतेतिभावः। प्रमाणां २४

तुरेति तथा च प्रमाणांतरकल्पना धर्मिकल्पनेति। धर्मिकल्पनातः स्वधर्मकल्पनायाः एव लघुत्वादिति भावः अन्यथा सन्निकर्षांतरकः ल्पनेन्त
ष्टानापि चानालोके तेन त्रेति तथा च जन्यसाक्षात्कारत्वावच्छिन्नं प्रति सन्निकर्षत्वेन कारणत्वमिति भावः। सन्निकर्षत्वं च संयोगाद्यन्यतमत्व
मिति ध्येयं अथ रूप एवेति तथा चात्रापि सन्निकर्षांतरमनायत्या कल्प्यकल्प्यमिति भावः। ननु सन्निकर्षस्यैकस्याभावो न। संयोगाद्यन्य
तमस्य समवायादिघटस्यैकमादाय विनिगमनाविरहेण निर्वक्तुमशक्यत्वेन तेन रूपेण कारणत्वात्। साक्षात्कारेभात्पउभयवला
त्सिद्धसाक्षात्कारत्वाजातेरानुपलब्ध्या ज्ञानत्वव्यापकस्यापि सुवचत्वादत आह। किंचेति। नन्वेवमिति। एवं इंद्रियसंबंधविशेषणता
याः अतिरिक्तायाः प्रत्यासत्तेः स्वीकारे। योग्यानुपलब्धेपीति। भवन्मतमतिरिक्तप्रमाणत्वेनांगीकृतायाः योग्यानुपलब्धेः अक्षरादिना अभा
वग्रहे सहकारित्वादित्यर्थः। तथा च घटोपलब्धेः सत्वेन योग्यानुपलब्धेरभावात्तेनाभावप्रत्यय इति भावः। योग्यानुपलब्धिं विविच्य दर्श

सि·टी· २५ तिश्चेति॥ननुजलपरमाणौचक्षुःसंयुक्तविशेषणतायांमानाभावादेवनपृथिवीत्वाभावग्रहःयद्यपितत्रमहत्त्वाभावस्यतज्ज्ञानस्यदोषात्तत्तादृश
सन्निकर्षोप्यस्तीतिविभाव्यमेतदाचक्षुःसंयुक्तविशेषणतायामपित्वेनमहत्त्वाभावग्राहकसन्निकर्षसत्त्वेपिपृथिवीत्वाभावग्राहकसन्नि
कर्षस्तत्रनास्तीतिफलबलात्कल्प्यतेतथाचतत्रनपृथिवीत्वाभावग्रहइत्यतआहस्तंभेति।योग्यदृश्यमानेनतथाचस्तंभेपिवायुभेदग्रहः
संभवतिनपरमाणौपृथिवीत्वाभावग्रहइतिभावः।एकदेशिमतंदूषयतिसुपन्यस्तेति।वाय्वोरिति।इदमुपलक्षणं।परमाणौमहदुद्भेदग्र
हाभावेत्यपिद्रष्टव्यं।योग्यानुपलब्धिंसिद्धांतयति।अत्रोच्यतइति।योग्येत्यस्यविवरणंसहकारिसंबंधेति।तथाचाभावप्रत्यक्षसामग्री
विशिष्टाइतियोगिनोऽनुपलब्धिरेवयोग्यानुपलब्धिरित्यर्थः।योग्यसन्निकर्षेतितथाचयोग्यसन्निकर्षस्यैवाभावप्रत्यक्षसामग्रीघटकत्वात् राम
योग्यत्वंचभानेवेतिध्येयं।उद्भूतरूपत्वाभावेनेतिउद्भूतरूपत्वघटितंसन्निकर्षयोग्यत्वमित्यर्थः।तथाचमहत्त्वस्यघटकतयोग्यताघटकत्वा २५

तेनउद्भूतोद्भूतरूपाभावग्रहः भवतीति सन्निकर्षयोग्यत्वात् उद्भूतरूपवद् इदादिग्रह इति शेषः। संक्षेप इति। वक्ष्यते। भावग्राहकसन्निकर्षयो
ग्यत्वस्युक्तरीत्या चक्षुः संयोगादिवैजात्यघटितं मातेजलपरमाणौ पृथिवीत्वाभावग्रहः अपि तु स्थूलेजलेपि शाब्दात्यंताभावे योग्यत्वं
गुरुत्वादिवत्तद्व्यक्तित्वेन तादात्म्येन लौकिकविषयतासंबंधावच्छिन्नसाक्षात्कारप्रतिबंधकत्वं इति तत्त्वमिति युक्तमुत्पश्यामः। अतिकिं
इदं पदार्थरूपं चक्षुरादिकिमित्यर्थः। उन्नयतीति तेजसमिति। आलोकवारणार्थं इंद्रियमिति। चक्षुषस्तैजसत्वं सविवादं अतो लक्षणां
तरणे माह। रूपग्राहक इति। मनस्यतिप्रसंगवारणाय महदिति। आलोकातिप्रसंगवारणाय महदिति। आत्मन्यतिप्रसंगवारणा
य इंद्रियमिति। रसनेऽप्यत्वं सविवादमत आह रसग्राहकमिति। एतस्य द्या। व्याघ्राणवत्ज्ञेया। एवं पार्थिवेंद्रियादिष्वपि यथायोग्यं ग्रा
ह्योयं। मनोवैभववादिनो मीमांसकाः पूर्वपक्षयंतीति। अत्र मीमांसका इति। मनः पक्षः विभुत्वं साध्यं विस्पर्शद्रव्यत्वं हेतुः अत्र निस्पर्श

सि·टी· त्वं गुणादौ व्यभिचारीति द्रव्यत्वं हेतावुक्तं। द्रव्यत्वमात्रं घटादौ व्यभिचारीति निःस्पर्शत्वमुक्तं। तथा च स्पर्शाभावविशिष्टद्रव्यत्वं हेतुरिति भावः। न
२६ नु दीधितिकृन्मते अदृष्टविशेषाकृष्टत्रुटेर्मनस्त्वेन पक्षतावच्छेदकस्य मनस्त्वैकस्याभावात् कथं पक्षतावच्छेदकावच्छेदेन साध्यानुमितिः
त्रुटौ विभुत्वस्य बाधात्। कथं वा तत्र विभुत्वानुमितिरित्यत आह मनस्त्वं चेति। तथा चानेकपृथिव्यादित्रुटीनां विनिगमनाविरहेणा
नेकत्वेन गौरवादिति लाघवादतिरिक्तमनःसिद्धिरिति भावः। आत्मन्यतिव्याप्तिवारणायात्मन्यो त्वेति। विभुत्वे इति। तथा च भावका
र्यस्यासमवायिकारणकत्वनियमेन मनोवैभववादिनां आत्ममनोयोगरूपासमवायिकारणासंभवेन ज्ञानाद्यनुत्पत्तिरिति भावः। इद
मापाततः। भावकार्यस्यासमवायिकारणत्वनियमस्यैकत्वादौ व्यभिचारीत्यवधेयं। मानाभावादिति। ननु लाघवमेवानुमानं अ राम
णुमनःकल्पने गौरवमत आह संयोगत्वावच्छेदेनेति। ननु लाघवे विभुमनःसिद्धौ अजसंयोगसिद्धावपि जन्यसंयोगत्वमेव द्रव्यजन्यतावच्छे २६

दकमक्ता। अत आह प्रयोजनं चेति। इदमनुमानं मनोवैभवानुमानं संक्षेप इति। तदर्थं क्रमं मनोवैभवे हि पंचेंद्रियज्ञानयौगपद्यापत्तिः। अतएव
विभुमनस्त्वित्याशंक्य स्वत्रकृतोक्तं। प्रयत्नज्ञानायौगपद्यादेकं मनः। एकैकस्मिन् शरीरे एकमेव मनः प्रयत्नायौगपद्यात् ज्ञानायौगपद्या
द्वेत्याचार्य्याः। किं च मनोवैभवे व्यासंगानुपपत्तेः। अपि च मनसोपि विभुत्वे गतं न च द्रव्य विभागेन आकाशेश्वरकालादिभिस्तत्कार्य्यसंभवा
दित्यलमनेनेति॥ ॥इति सिद्धांतमंजर्यां प्रत्यक्षपरिच्छेदविवृतिः। प्रत्यक्षनिरूपणानंतरं एकप्रयोजनताख्यां संगतिं प्रदर्शय
न् शिष्यावधानायानुमाननिरूपणं प्रतिजानीते अथेत्यादिना। अवधानं विषयांतरात् मनोविच्छित्तिः। प्रतिज्ञा च उच्चैः शब्देन प्र
तिपादनं। तथा चोच्चैः शब्देन प्रतिपदनात् भवति शिष्याणां विषयांतरात् मनोविच्छेदरूपावधानं तेन चानारोप रुदितं शास्त्रं भवती
तिभावः। अथ प्रत्यक्षनिरूपणानंतरं क्षणानिष्ठः। निरूपणं लक्षणा स्वरूप प्रमाण्यादि प्रकारादि ज्ञानानुकूला व्यापारानंतरक्षणानिष्ठाता

दाप्यलक्षणास्वरूपप्रामाण्यादिप्रकारकज्ञानानुकूलो व्यापारस्तद्विषयोऽनुमानं इति समुदायार्थः। अनुमानं प्रमानुमानं तेन प्रमाणत
त्वमत्र विवक्ष्यते इत्यनेन विशेषः। व्यापारश्चात्र यद्यपि शाब्दादिः स च निर्विषय एव तथापि व्यापारानुबंधिनी विषयता बोध्या। अथ शाब्दस्य
लुप्तद्वितीयाविभक्तिकस्य योऽर्थः प्रत्ययरूपविशेष्यकलक्षणास्वरूपप्रामाण्यप्रकारकज्ञानानुकूलव्यापारानंतरं लक्षणानिष्ठरूपः सह भे
दसंबंधेन निरूपणारूपक्रियार्थेन विशेषणतयाऽन्वेति स्तोकं पचतीतिवत् तथैव माकांक्षितत्वादिति ज्ञेयं। केचित्तु पदस्य नानंतरं लक्षणा
निष्ठधर्मिणि शक्तिः किंत्वनंतरं लक्षणावृत्तित्वे धर्म एव शक्तिः तस्य चाश्रयाश्रयिभावसंबंधेन निरूपणास्वरूपक्रियार्थेनान्वयः। क्रियावि
शेषणस्थले एवाभेदान्वयनियमः। एवं नामार्थधात्वर्थयोरभेदान्वये विभक्त्यपेक्षापि अव्ययातिरिक्तस्थले एवेत्याहुः। नन्वाक्ष्याथश
ब्दस्यानंतरक्षणे एव शक्तिरानंतर्यं चाधिकरणतया ध्वंसविशिष्टत्वं तथा चाथपदोत्तरं तु प्रसप्तम्यर्थो निष्ठता तस्यामेवाथशब्दार्थस्य

सविशिष्टज्ञानस्यान्वयः॥ननुधात्वर्थ इत्याद्युक्तं।अत्रच लिङ्गसाध्यसमभिव्याहारलभ्यव्याप्तेर्हेतुहेतुमद्भावस्य यदितु निरूपणीयोः संगतिर्न्न निरू
प्ययोः पौर्वापर्यनियामिका इति विभाव्यते। तथा प्रतिबंधकजिज्ञासामानिवृत्तौ अवश्यवक्तव्यमित्यस्यावसरस्य संगतित्वं अर्थोत्पन्ने न स्व
यंतोवक्तव्यतो ऽथशब्दो मंगलात्मकं इति तत्वंग्रंथादौ मध्ये मंगलमाचरंति। तत्र लक्षणस्वरूपप्रामाण्यादिभिरनुमानेनिरूपणीये।
अत्रानुमानमितिलक्ष्यनिर्देशः॥अनुमितिकरणत्वं लक्षणं। अन्यथा उद्देश्यतावच्छेदकविधेयतावच्छेदकयोरैक्येन घटो घट इतिव
त् लक्षणवाक्यं निराकांक्षं स्यात्। अनुमितिकरणमित्यस्य व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानकारणमित्यर्थो वाच्यः। तथा
चलाघवात् व्याप्तिज्ञानत्वमेवानुमानलक्षणमस्त्वित्यत आह अनुमिनोमीति। तथा चोक्तरूपेणानुमितेः प्रवेशः॥ किंत्वनुमिति
त्वेनेति। न लाघवगौरवं। स्वभावइतिभावः। ननु अनुमितित्वं मानसत्वव्याप्यजातिर्वक्तव्यं किंवा वह्निमनुमिनोमीति प्रतीत्या वह्नि नि

सि·टी· त्वाविलक्षणविषयतासिद्ध्यभावस्यकार्य्यतावच्छेदिकाभासतेनतदनुमितित्वंअनुमिनोमीतिधीःसामान्यतोनास्तीति।तथाचतत्करणस्या
२८ पितत्स्वरूपप्रमाणत्वात्ताचतुर्द्धाप्रमाणविभाजनमसंगतमतआह।जन्यज्ञानजन्येति।तथाचानुमितित्वंनजातिःनचाविलक्षणविषय
ता।किंतत्सोपाधिस्वरूपंमानसाघृत्तिकार्य्यतानवच्छेदको।अतएवकार्य्यकारणभावकल्पनागौरवमपिनास्तीतिभावः।अत्राव्यभि
चारित्वोतंव्यभिचारित्वात्त्वंवद्वयमेवजातिविशेषणं।धत्पज्ञातिषसंगवारणंअव्यभिचारित्वांतेनजातिविशेषणेनइदमेवविषदयति
।धन्यज्ञावारणायेति।तद्भिन्नत्वंजन्यधीजन्यत्वंतत्रापिजन्यज्ञानजन्यत्वाद्व्यभिचारित्वेपि।तद्विचारुघत्वंहि।तदाश्रयाणांतद्विउपमिति
त्वशाब्दत्वादिजातिस्वरूपंहिनयथो।क्तेति।नजन्यशाब्दज्ञानजन्यत्वव्यभिचारीत्यर्थः।समयगिति।किंजन्यत्वेनशाब्दज्ञानविशेषणेनेति राम
शेषः।नवमोक्तजनकतावच्छेदकमिति।तथाचतांजातिमादायतत्वसाक्षात्कारेऽतिव्याप्तिरितिभावः।अतिव्याप्तिंनिरस्यतितस्येति।ता २८

दृशजातिविशेषेत्यर्थः। शाब्दविशेषविषयकेति। श्रोतव्योमंतव्यश्चेत्यादि श्रुतिजन्यशाब्दबोधजन्येत्यर्थः। जन्यशाब्दज्ञानजन्यत्वाव्यभिचारित्वात्।
जन्यशाब्दज्ञानप्रयोज्यत्वाव्यभिचारित्वात्तथाचतादृशजातिर्नजन्यशाब्दज्ञानप्रयोज्यत्वव्यभिचारीतितत्ताजातिमादायोतिव्याप्तिरितिभा
वः। इत्थंचानुमितिलक्षणेजन्यशाब्दप्रयोज्यत्वव्यभिचारीत्यर्थोज्ञेयः। नचतत्त्वसाक्षात्कारस्यशाब्दज्ञानप्रयोज्यत्वेमानाभावेनतत्राति
व्याप्तिरस्तुद्वारादित्यतआह। जातिपदंचेति। अतएवजातेर्मानसाहत्तिविलक्षणादेवा। स्मृतिवारणायेतिस्मरणीत्वमनुभवसाक्षिकोजा
तिविशेषएवस्मृतित्वं। अनुभवसामग्रीप्रतिबध्यतावच्छेदकतयावासिद्धस्मृतित्वंजातिरित्यभिप्रायः। व्याप्तिज्ञानंपक्षज्ञानंव्याप्तिवि
शिष्टपक्षादिज्ञानंमतभेदेनानुमितिकरणमितितत्रिशविकार्युः। स्वमतेनानुमितिकरणंचाभिधातुंएच्छति। नत्विति। उत्तरयतिव्याप्ति
ति। नत्वितितथाचलाघवात्। लघुपदार्थसाध्यस्यहेतोर्व्याप्तिज्ञानमेवानुमितिकरणंनतुव्याप्तिज्ञानं। अभावादिज्ञानंवागौरवादितिभावः।

प्रसंगात्तद्व्याप्तिं निरूपयितुमाह। नन्विति। पर्वतीयवह्न्यत्यंताभाववतीति। साध्यतावच्छेदकावच्छिन्नसाध्यात्यंताभावे विवक्षिते। एतद्दोषपरिहा
रेपि केवलान्वयिन्यतिव्याप्तिर्दुरुद्धारैवेति न तथा विवक्षितमिति भावः। केवलान्वयिसाध्यकानुमानमेवेति। तथा च तत्रानुमानमलीकमेव
भूतः। साध्यस्य केवलान्वयित्वज्ञानदशायामनुमित्यपलाप इत्यर्थः। तथा च तेषां लाघवात् साध्यवदन्यावृत्तित्वज्ञानस्यानुमितिकारणत्वे
न्न तेन केवलान्वयित्वज्ञानदशायामनुमितिर्न जायत इति। तथा च व्यतिरेकित्वज्ञानकालीनतादृशानुमितेः सत्त्वे लक्षणं व्याप्तेस्तत्राव्या
प्तमेवेति तत्त्वं इहेति। केवलान्वयित्वज्ञानदशायामपीति शेषः। तथा चानुमितिः सुप्रसिद्धैवेति भावः। सिद्ध्यसिद्धिव्याघातादाह। किं चेति।
न ह्यलीकमज्ञेयमिति। तथा चालीकेपि ज्ञेयत्वस्य साध्यस्य सत्त्वेन साध्याभावाप्रसिद्ध्या व्याप्तिरिति भावः। आहुरित्यत्रास्वरसमाह। तन्नेति।
लक्षणवाक्य इत्यर्थः। वदंति दूषणमिति शेषः। कार्त्स्न्यं कुत्रान्वेतीति पृच्छति। कोयमिति। कृत्स्नेसाध्येनेति। तथा च कार्त्स्न्यं साध्ये साधने साधन

वतिवा विशेषणमित्यर्थः।कात्स्न्र्येन साध्यवतिवेति तु नोद्दंकितं।अत्र कल्पे दोषस्य साधनवतिकात्या विशेषणदोषस्यैव सुप्रसिद्धत्वादुपेक्षितं।
सुप्रसिद्धानुमाने वह्निमान् धूमादित्यादौ।इदमुपलक्षणं एकव्यक्तिकसाध्यकव्याप्तिश्च बोध्या।एकव्यक्तिकहेतावित्ति।जातिमान् सत्वादि
त्यादौ एकमात्रवृत्तीति।एतद्रूपवान् एतस्मात् इत्यादौ व्याप्तिस्वरूपं सिद्धांतयति।अत्रोच्यत इति।साध्यसामानाधिकरण्येति।साधनता
वच्छेदकसंबंधेन साधनाधिकरणे विशेषणतासंबंधेन वृत्तित्वव्यापकतावच्छेदकसंबंधेन साध्याधिकरणविशेषणतावच्छेदकसंबंधे
न वृत्तित्वमित्यर्थः।तेन कालिकेन धूमाधिकरणे वृत्ति जलत्वादिर्वह्निसामानाधिकरण्येपि वह्निसामानाधिकरण्यायोगोलकत्वादेः का
लिकेन धूमाधिकरणे सत्वेपि नाव्याप्तिरतिव्याप्तिर्वेति।न च येन येन संबंधेन साध्यं न सामानाधिकरण्यं तेन तेनैव साध्यसामान्याधिकरणा
धिकरणे संबंधानुगमो दोषः।इदमेव विघटयति।यत्सामानाधिकरणा इति।अयर्थःक्षयायुक्त एव न केमहद्गौलक्षणं लापयति भवता।

सि·दी· हीति। धूमसमानाधिकरणाभावं तद्इति धूमवत्वप्रकारकप्रमाविशेष्यत्वादयइत्यर्थः॥ अलक्ष्यलक्षणं निवारयति। नहीति। वह्निसमानाधिकरणेति
३० विशेषणात्तथेत्यर्थः॥ उक्तव्याप्तेर्हेतुवृत्तित्वात्तल्लक्षणान्तरमाह। यद्विशिष्टेति। हेतुतावच्छेदकविशिष्टेत्यर्थः। तेन द्रव्यं गुणकर्मान्यत्वविशि
ष्टसत्वादित्यादौ विशिष्टसत्वस्य सत्वानतिरेकेन सत्तानतिरेकेन सत्तासमानाधिकरणगुणत्वप्रकारकप्रमाविशेष्यत्वस्य विशेषणता संबंधे
न द्रव्यत्वासमानाधिकरणत्वेपि नक्षतिः गुणस्य विशिष्टसत्तात्वावच्छिन्नानधिकरणत्वेन गुणत्वप्रकारकप्रमाविशेष्यत्वस्य हेतुतावच्छे
दकावच्छिन्नासमानाधिकरणत्वात्। एवं हेतुतावच्छेदकसंबंधेनत्पाद्यन्यत्सर्वं पूर्ववद्व्याख्येयं। असद्धेतौ लक्षणं व्यावर्त्तयति। नचेति। ईदृश
वह्नित्वविशिष्टसामानाधिकरण्यं सार्वं धूमसमानाधिकरणमित्यर्थः। केवलान्वयिनि लक्षणं संगमयति। अस्ति चेति। यावतां विशेषणेति
शेषः। एवमिति। अपास्तमपास्तमित्यग्रेतनेन संबध्यते नेदमनुमानं न केवलान्वयिसाध्यकात्तु मितिरित्यर्थः। ततोपि साध्यवदन्याद्वृत्तित्वस राम ३०

तिसाध्यसामानाधिकरण्यादपि लघुत्वात्। अभावाप्रवेशेनेत्यर्थः। मेयत्वमनुमिनोमीत्यनुभवापलापापत्तेश्चेति प्रागुक्तदूषणं च द्रष्टव्यं। अत ए
व लघुत्वादिति हेतुः स्त्रीत्वपरः। तथा हि अभावाप्रवेशालाघवं चेत्तन्न तत्र पक्षतेयद्विशिष्टसामानाधिकरण्यावन्तद्यत्र यावत्त्वस्य व्याप
कत्वात्तस्य दुर्वचत्वात् व्यापकत्वस्याभावघटितत्वादिति तेषां विद्भ्रममुक्तं। यावत्त्वस्यापेक्षाबुद्धिविशेषविषयत्वस्य अभावाघटि
तस्यापि वक्तुं शक्यत्वात् इति ध्येयं। अत्र चार्वाका इति। अत्र अनुमितिकरणत्वेन व्याप्तिनिश्चयत्वस्य प्रमाणत्वे चार्वाकाः पूर्वपक्षयं
तीति शेषः। पूर्वपक्षमेवाह भवत्विति इति शंकायाः इत्याकारकव्यभिचारशंकाया इत्यर्थः। भूयोदर्शनात्। भूयः साध्यसाधनयोः सा
मानाधिकरण्यदर्शनात्तन्निवृत्तिः शंकानिवृत्तिः। शतश इति। पृथिवी लोहलेख्या पृथिवीत्वादित्यादौ घटपटादिष्विव बहुस्थलेषु साध्य
साधनयोः सामानाधिकरण्योपलब्धावपि हीरके व्यभिचारोपलब्धेर्न तत्र व्याप्तिनिश्चय इत्यर्थः। तर्कस्येति। आपाद्यापादकयोर्व्याप्तिनि

सि·टी· अथयस्यतर्कोपिकारणत्वात्तत्रापिव्यभिचारशंकानिवृत्त्यर्थंतर्कान्तरापेक्षायामनवस्थानादित्यर्थः। कुतोऽनुमानंकुतोहेतोरनुमानमित्यर्थः॥ तथाच
३१ व्याप्तिग्राहकाभावेनव्याप्तिनिश्चयासंभवादनुमानं [illegible] प्रमाणमितिभावः। व्यभिचारज्ञानविरहादिकमिति। अत्रज्ञानंनिश्चयः शंकाचव्या
दिपदात्सहचारज्ञानपरिग्रहः। नन्वडःशंकइतिशंकायाःसर्वत्रसंभवित्वेनतदभावस्यकुत्राप्यसंभवात्ननुव्यभिचारशंकाक्वचित्क्वचिद्व
तर्कागणककोटिस्मृत्यादिकमवश्यंभवितव्यमित्यतआह। अनुभूयतेवेति। तथाचप्रमाणाभावेनव्यभिचारसंशयसामग्रीसंशयोवा
निश्चयोवानसर्वत्रेतिभावः॥ नन्विति। इहश्रोतिश्वतमहानसीयधूमेव्याप्तिग्रहोनतुपर्वतीयधूमत्वेपकोऽइत्यर्थः। उक्तेति। यद्विशिष्टसमा
नाधिकरण्यावंनसाध्यसमानाधिकरणेत्यादीत्यर्थः॥ धूमत्वेनगृहीतेति। तथाचधूमत्वप्रकारकव्याप्त्यनुभवेनधूमत्वप्रकारेणमहानसी राम
यगृहीतव्याप्तेःस्मरणंततःस्मृतव्याप्तिविशिष्टावगाहिभ्रमरूपंपरधर्मताविषयकंजायतेततोऽनुमितिरित्यर्थः। नचअनुमितिप्रामाण्यप्र ३१

योजको यथार्थपरामर्श एव तु गुणः संप्रदायसिद्धः स च दृष्टांते वह्निव्याप्तिभाने सर्वत्र परामर्शो यथार्थत्वेन संभवतीत्यत आहाद्यत्वेति। सकलधूमगोचरमे
वेति। तथा च धूमत्वसामान्यलक्षणाप्रत्यासत्त्या पर्वतीयधूमेपि व्याप्तिग्रहो महानसधूमे व्याप्तिग्रहदशायामिति तत्स्मरणात्। विशिष्टपराम
र्शो यथार्थ एवेति भावः। तदाश्रयसाक्षात्कारजननीत्यनेन तरं तदेव तत्तु न संभवतीति शेषः। तत्र ज्ञानमदाहात तदा विषुद्धितेति यत्सामान्यमिति।
तथा च तत्तद्रूपीयधूमत्वाश्रयसामान्यलक्षणस्य रूपतिन तत्तद्रूपीयचक्षुर्लौकिकसन्निकर्षविशिष्टविशेष्यकतत्तद्रूपीयचाक्षुषप्रकाराद्
तद्धूमत्वेन कारणताप्रयोजकाणां यं चात्र तदिन्द्रियकरणकतद्धर्मबोधकसामग्र्यं तां तेन गाढांधकारे सौदामिनीसंपादननिनेविद्युच्चपत्य
त्वेरामेन चाक्षुषो निखिलद्रव्यसाक्षात्कारसंतान इति भाव इति तत्त्वा। यत्र धूम इति तथा च दृष्टांते वह्नि धूमे व्याप्तिज्ञानान्तदृष्टांते त्वनुमि
तिः स्यादित्यर्थः। न चेति। पक्षावृत्तिधूमविशेष्यकव्याप्तिज्ञानेकारणमतो दृष्टांतीयधूमविशेष्यकव्याप्तिज्ञानानुमितिरित्यर्थः। धूमत्वेन सा

सि॰दी॰ सामान्यलक्षणेति।तथा च सामान्यलक्षणाजन्यासत्त्याहृष्टं तादृशधूमविशेष्यकं जायमानं पक्षवृत्तिधूमविशेष्यकमपीत्यर्थः।।न च हेतोरिति।पक्षत्वं
३२ च संदिग्धसाध्यवत्त्वमिति भावः।धूमज्ञानस्य सत्त्वात् धूमस्य पक्षवृत्तित्वाज्ञानादित्यर्थः।व्याप्यत्वप्रकारेणेति।व्याप्तिविशिष्टवैशिष्ट्यावगाहिनि
श्चयोऽनुमितिहेतुरित्यर्थः।व्याप्तिज्ञानमात्रमित्यत्र मात्रपदेन पक्षधर्मताज्ञानस्योदासः।।ननु व्याप्तिज्ञानं पक्षधर्मताज्ञानं च दंडचक्रादिवत्
कारणत्वमस्तु।किं वैशिष्ट्यवैशिष्ट्यावगाहित्वेन कारणत्वेनेत्येकस्त्वथाकारणत्वविवक्षणफलमाह नचेति।अथैकरूपेण व्याप्तिपक्षधर्म
तोभयावगाहित्वोक्तौ नायमतिप्रसंग इति किं व्याप्तिविशिष्टवैशिष्ट्यावगाहित्वेन हेतुत्वेनेति चेन्न।तथा सति वह्निव्याप्यवानिति निरवच्छि
न्नव्याप्तिप्रकारकपक्षधर्मताविषयकशाब्दादिज्ञानानुमित्यनुत्पादापत्तेः।।निश्चयपदमिति।तथा च व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वे राम
न कारणत्वमिति भावः।व्याप्तिज्ञाने सहकारिव्याप्यतावच्छेदकप्रकारव्याप्तिज्ञानेनानुमितेर्जननीयेकारणमित्यर्थः।प्रागुक्तातिप्रसंगं ३२

मीमांसकोवारयति।व्याप्यतावच्छेदकमिति।इतिज्ञानोदयादपिनावह्निव्याप्यधूमवानितिव्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानसमुच्चयः।ननुभव
तोकारणतावच्छेदकलाघवेपिकल्पनागौरवमापततीति।तथाहियत्रज्ञानद्वयात्तन्मीमांसकस्यानुमितिस्तत्रक्रमापलापोविशिष्टवैशिष्ट्या
वगाहिज्ञानतद्भ्रमादिकल्पनंचाधिकमतआह।किंचेति।धूमत्वेनेति।तथाचव्याप्यतावच्छेदकरूपेणाव्याप्तेःपक्षधर्मतायाश्चानवगाहनादि
त्यर्थः।तृतीयलिंगपरामर्शत्वेनप्रसिद्धादेवेत्येवकारेणमीमांसकोक्तज्ञानद्वयव्यवच्छेदः।एवंचात्रविशिष्टवैशिष्ट्यावगाहिज्ञानत्वेनलाघ
वात्।कारणतायांतुनायंज्ञानद्वयान्नानुमितिः किंतुक्रमाविलंबेनविशिष्टवैशिष्ट्यावगाहिज्ञानमंगीकृत्यैतन्नियमोवर्ततेतत्फलमुख
तयानदोषमाहतीतिभावः।तृतीयमिति।अनुमितिकारणीभूतोलिंगपरामर्शः तृतीयएवेतिकथमित्यर्थः।दृष्टांतेधूमदर्शनंप्रथममि
त्यर्थः।व्याप्तिभानमिति।दृष्टांतीयधूमस्यव्याप्तिमत्तयाभानंद्वितीयमित्यर्थः।तद्विशिष्टेति।दृष्टांतेप्रागनुभूतेदानींस्मृतव्याप्तिविशिष्टस्यहे

सि॰टी॰ तेःपक्षवृत्तिताचगाहिज्ञानंतृतीयमित्यर्थः।प्रामाणिकंगौरवंनदोषायेत्यत्राह।यद्यपिचारात्वेति।सिषाधयिषाधीनमहानसादानतुमितिसंभ
३३ वेद्वितीयज्ञानस्यापितत्रानुमितिकरणस्यसंभवादितिभावः।सोयपरामर्षः।व्याप्तिविशिष्टवैशिष्ट्यावगाहिउक्तत्वतृतीयज्ञानात्मकइत्यर्थः।व्या
पाराभावादिति।यद्यपिसिद्धस्थलेनपरामर्शसिद्धिनाशोव्यापारःसंभवतितथापिपरामर्शमात्रेतथाऽसंभवतात्पर्यंतथाचव्यापारवत्कार
णत्वमेवकरणत्वमितिभावः।परामर्शव्यापारकंत्वनुमितिकरणमितिविशेषः।भूतभाविस्यामिति।यद्यपिस्वस्वव्यापारान्यतरस्यानन्यथासि
द्धनियतपूर्ववर्तित्वमेवकारणत्वंतच्चपरामृष्यमाणभावीनष्टेवाल्लिंगेपिसंभवति।तृतीयलिंगपरामर्शस्यतव्यापारस्यतत्रसत्वात्।तृतीयलिं
गपरामर्शेलिंगज्ञानत्वादिनाकारणत्वेनावच्छेदकाऽसतातीतादिहेतोरपिकारणत्वात्।अविषयकव्यापारेकारणत्वस्यकारणकारणतावच्छे राम
दकसाधारणस्यापिवक्तुंशक्यत्वादिस्फुटीभविष्यति।तथापिव्यापारत्वावच्छिन्ननियतपूर्ववर्तित्वस्यैवात्रप्रमाणत्वेनविवक्षितत्वात्।अतीता ३३

नागतादिज्ञायमानलिंगेचतदसंभवात्।अतएवव्यापारवत्कारणंकारणंइतिकरणसामान्यलक्षणंव्यापारत्वावच्छिन्ननियतपूर्ववर्त्तित्वा
र्थकमितिप्रामाणिकाः।वक्ष्यतेपरामृश्यमानलिंगत्वेनैवकरणता।अतएवतत्रानुमानंत्रिविधमित्युक्ताकेवलान्वयिसाध्यकादिनात्रैवि
ध्याहेतुधर्मत्वेनवक्ष्यति।नचविनिगमनाविरहः।परामृश्यमानलिंगापेक्षयालिंगपरामर्शत्वेनकारणत्वस्यएकलिंगाविषयकना
नापरामर्शस्यकारणताकल्पनगौरवपराहतत्वात्।विनिगमनाविरहेनापिपरामृश्यमानलिंगत्वेनकरणतासिद्धेरपस्य
हत्वाद्यानवातीतादिलिंगेपूर्ववर्त्तित्वघटितकारणताबाधात्तद्विशेषकरणत्वबाधइतिवाच्यं।स्वव्यापारान्यतरपूर्ववर्त्तित्वम
वकारणत्वंतेनविशिष्टप्रमिजनकदंडस्यापिकारणत्वं।तस्यातीतादिलिंगेपिसत्त्वात्।नचलिंगस्यकारणत्वेऽतीतादौकारणता
याःसर्वलिंगेचकरणतायानिर्वाहकत्वतृतीयलिंगपरामर्शएवव्यापारोवाच्यस्तच्चनसंभवति।तृतीयलिंगपरामर्शविनष्टस्याविद्यमान

सि·टी· स्यवालिंगस्याकारणत्वात्इतिवाच्यंतृतीयलिंगपरामर्शेलिंगज्ञानत्वेनहेतुतायांलिंगस्यापिविनष्टकारणताग्राहकमानेनहेतुत्वंसिद्ध
३४ ति।सविषयकव्यापारेकारणतावच्छेदकावलीढपूर्वावर्त्तित्वेनहेतुत्वेविशिष्टकारणताग्राहकेनमानेनमानेनातीतलिंगस्यापिविशि
ष्टपरामर्शोव्यापारःसिद्ध्यति।एवंचानुव्यवसायजनितसंस्कारोव्यवस्यापिव्यापारोनकार्य्यकारणभावांतरकल्पनमपीतिलाघव
मितित्वंकिंचित्ति।व्याप्तिज्ञानस्यकरणत्वेकरणतावच्छेदकगौरवादाह।साध्येति।ननुसाध्यत्वमपिलिंगनिष्ठव्याप्तिनिरूपकत्वादिदृ
पंगुरुभूतमेवेत्यतआह।लिंगज्ञानंचेति।इतोपिलाघवादाह।जन्यज्ञानमात्रेति।अत्रकरणफलयोःसामानाधिकरण्येनकार्य्यकार
णभावात्ईश्वरेणानुमितिरसत्वात्।ज्ञानजन्यत्वंविशेषितमितिध्येयं।अतिप्रसंगःघटज्ञानादनुमितिप्रसंगः।व्यापाराभावेनपरामर्श राम
रूपव्यापाराभावेन।तन्निरासात्।अतिप्रसंगनिरासात्।ननुजन्यज्ञानत्वेनपरामर्शव्यापारत्वस्यानुमितिकरणतायांस्मरणात्मकपरा ३४

मर्शान्नानुमितिः स्यात्तान्नत्स्मरणात्मकपरामर्शव्यापारकस्यैव संस्कारस्यैव सत्वान्नतु ज्ञानस्येत्यतो ज्ञानपदं चेति। तथाच जन्यसविषयत्वेन
संस्कारे व्याप्तानादिसाधारण्येन परामर्शव्यापारज्ञानोसंस्कारादीनां करणत्वमिति भावः। जन्यज्ञानत्वेनैव करणत्वं स्मरणात्मकपराम
र्शस्थले तु स्वजन्यसंस्कारजन्यस्मरणात्मकपरामर्श एवानुभवस्य व्यापार इति तत्रापि ज्ञानजन्यत्वेन ज्ञानकरणत्वं स्वस्य चमित्याह पू
र्वानुभव एवेति। पूर्वानुभवस्यैवेत्यर्थः। क्वचित्तु वाकारशून्यपाठः क्वपाठःक्वपामादिकः। तद्वेति अनुमानं मनुमितिकरणमित्यर्थः। त्रैवि
ध्यमाह। केवलान्वयीति। तत्रेति त्रिविधेषु निरूपणीयेष्वित्यर्थः। केवलान्वयीति भावः। यद्वानुमितिः भावे घुट तथाच केवलान्वयि
साध्यकानुमितिः केवलान्वयीत्यर्थः। केवलान्वयित्वं पारिभाषिकं विज्ञाय तद्घटकसाध्यकेवलान्वयित्वजिज्ञासुः सुद्धरयति। तत्रेति। के
वलान्वयित्वनिरुक्तानि विष्टसाध्येत्यर्थः। तथाच तन्निरुक्तो साध्ये वास्तविकं इदं केवलान्वयित्वं निष्टमिति भावः। सर्वेति। प्रतियोगिस

सि·दी· मानाधिकरणं यद्यत्तद्भिन्नात्यंताभावाप्रतियोगित्वमर्थः॥ अभावे स्वाभिन्नमत्वविशेषणात्तेनाकाशाभावेऽत्याप्तिः॥ प्रतियोगिवैयधिकरण्यविशेष
३५ णाद्वा संयोगात्यंताभावेऽव्याप्तिरिति भावः॥ यद्वा अन्योन्याभावप्रतियोगितानवच्छेदकत्वमेव केवलान्वयित्वमित्यर्थः॥ लक्षणमाह यथेति॥ अ
भिधेयत्वादिकं किं तदाह॥ भगवद्भिरिच्छेति॥ अस्माच्छब्दादयमर्थो बोद्धव्य इत्याकारिकेश्वरेच्छा शक्तिः ग्राह्यविषयत्वमित्यर्थः॥ वस्तुतइति॥ यत्र त
पदशक्यत्वाद्वेत्यपि द्रष्टव्यं॥ भगवज्ज्ञानविषयत्वादिति॥ प्रमेयत्वादिसामान्यलक्षणाजन्य प्रमेयं सर्वं इत्याद्यस्मदादिज्ञानविषयत्व
स्यापि सत्वाद्वेत्यपि बोध्यं॥ अत्र केवलान्वयिसाध्यकानुमितिरेव न संभवति॥ अनुमितिसामग्र्याभावादित्याशंकते॥ अत्र केचिदिति॥ प्राचपरा
तेत्यर्थः॥ इति केवलान्वयिसाध्यकमित्यर्थः॥ सिषाधयिषेति॥ साधयितुमिच्छा सिषाधयिषा तद्विरहवैशिष्ट्यं च साध्यवत्वनिश्चयविशेषणं॥ राम
अत्र वैशिष्ट्यमेककालावच्छेदेनैकात्मवृत्तित्वं तेन भिन्नकालीनविभिन्नाधिकरणकसिषाधयिषाकालीनसिद्धौ न पक्षतेति भावः॥ प्रकृते ३५

केवलान्वयिनि पक्षतामुपपादयति। सत्वेति। नन्विति संशयः क्वेनेति शेषः। विशिष्टान्तं सिषाधयिषाविरहविशिष्टान्तमित्यर्थः। संदेह इति।
एवं विशिष्यद्वलं विना सिषाधयिषाविरहाभावः पक्षतेत्युक्तौ सिषाधयिषाशून्यसिद्ध्यभावस्थले पक्षता न स्यादिति। तत्र विशिष्टाभाव
संपत्तये विशेष्यभाग इत्यर्थः। केवलव्यतिरेकित्वमाह। असत्पक्ष इति। निश्चितसाध्यत्वं सपक्षत्वं तत्शून्यहेतुश्च केवलव्यतिरेकी
त्यर्थः। हेतौ असत्पक्षमेवाहानत्वं चेति। असत्पक्षत्वं चेत्यर्थः। साधनसहचारेति संपातायातं पक्षातिरिक्ते अनिश्चितसाध्यकत्वमेवला
घवेन सम्यक्त्वात्। साध्यसाधनसहचर्यमज्ञाति इदं च ज्ञानागर्भितमेव व्यतिरेकित्वमित्यभिप्रेत्य निश्चयगर्भितं तदित्यभिप्राये
णाह। निश्चीयते चेति। न चेति। अनिश्चितसाध्यकत्वमेवेत्येवकारेण पक्षातिरिक्ते स्यादित्युदासेन क्वचित्साध्यसाधनसाहचर्यमेवे
पाठः। स च साधनांशे वैयर्थ्याद्धेयः। घटादाविति। तथा च पृथिवीत्वेन पक्षतायां घटादेरपि पक्षान्तर्गतत्वात्। तत्र साध्यनिश्चयेऽपि प

शि.टी. क्षतातिरिक्ते साध्याद्दिनिश्चयासत्त्वात्तत्र व्यतिरेकित्वहानिरिति पक्षातिरिक्तेत्यवच्छेद्यं व्यतिरेकित्वलक्षणेऽनिवेश्यमिति भावः॥ अन्यथा घटादेः
३६ साध्यानिश्चयेनिरूपनानापत्तेरित्यर्थः॥ क्वपक्षतेति॥ सिद्ध्यभावस्य पक्षतात्वात्॥ तस्य चासत्त्वादित्यर्थः॥ पृथिवीत्वावच्छेदेनेति॥ अ
वच्छेदकावच्छेदेनानुमितिं प्रति अवच्छेदकावच्छेदेनानुमितिं प्रति अवच्छेदकावच्छेदेनानुमितिं प्रति अवच्छेदकावच्छेदेन तादृशसि
द्ध्यभाव एव पक्षतेत्यर्थः॥ तथा च घटादौ पृथिवीत्वसामानाधिकरण्येन विद्यमानापि सिद्धिर्न पक्षतावच्छेदकावच्छेदेनानुमिति
कारणपक्षताविरोधिनीति भावः॥ सोऽपि पक्षतावच्छेदकावच्छेदेन साध्यनिश्चयोऽस्ति इदन्तु समाधिः सौकर्य्यादुक्तं वस्तुतो घटो इतरभि
न्न इति घटत्वेन घटे इतरभेदज्ञानेऽपि पृथिवीतरभिन्ना इति पृथिवीत्वेन घटे इतरभेदानुमितौ बाधकाभावात्॥ समानधर्म्मितावच्छेद राम
कसमानविषयकसिद्धेरेव पक्षताविघटकत्वात्॥ अत एव पर्वतो वह्निमान् इति सिद्धावपि स्यादवयवो वह्निमानित्यनुमितिः सर्वानुभ ३६

विकीप्रसंगात्व्यतिरेक्यनुमितौ कारणीभूतज्ञानविषयव्याप्तिमाह। अन्वेति। अन्वयव्यतिरेक्यनुमितौ उक्तासाधनसामानाधिकरण्यायावत्
समानाधिकरण्यरूपा। यांच इत्यनेनास्वरसस्सूचितः सच सामानाधिकरण्यज्ञानं विशेषणा। ज्ञानविषयाव्यभिचाराज्ञानाभावस्य
सतिवेधकाभावविषयाकारणोव्याप्तिज्ञानेनचसाध्याभावहेत्वभावयोःसामानाधिकरण्यंनिरुक्तव्याप्तेर्ज्ञायमानेपकारतयाभा
सते। अपितुसाध्यसाधनयोरेवेति। कथमभावयोःसामानाधिकरण्यज्ञानानादृशाव्याप्तिग्रहइतिअतएवदीधितिकृतापिव्यतिरे
कसहचारेणान्वयव्याप्तिग्रहणमुपायाणीत्येति। वाकारोऽयमस्वरसस्सूचनायैवदत्तइतिध्येयं। नचेतिअभावयोर्व्याप्तिग्रहःकथंभा
वानुमापकइत्यर्थः। अतिप्रसंगादिति। घटव्याप्तिग्रहात्पटानुमितिःस्यादित्यर्थः। साध्येति। तथावईदृशव्यतिरेकव्याप्तिविशिष्ट
नयहेतोःपक्षधर्मतावगमात्। अनुमितिसंभवात्इत्यर्थः। साध्यानुमापकःव्यतिरेकिणीतिशेषः। अन्येनव्याः। उभयान्यइतिके

सि·टी· वलान्वयिकेवलव्यतिरेक्यन्य इत्यर्थः।वस्तुतोन्वयव्यतिरेकसहचाराधीनग्रहात्तद्व्याप्तिकत्वमेवान्वयव्यतिरेकित्वं लाघवादिति तत्त्वं।यथा
३७ प्रसिद्धेति।वह्निमान्धूमादित्यर्थः।एवमिति।केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिहेतावभिहितेत्यर्थः।तदाभासाः हेत्वाभासा
इत्यर्थः।तत्त्वनिर्णयविजयप्रयोजकत्वादिति शेषः।हेत्वाभासत्वं च साध्यव्याप्यवान्साध्यवानित्याकारानुमितिकारणीभूताभा
वप्रतियोगियथार्थज्ञानविषयत्वं व्यभिचाराद्यन्यतमत्वं वा इत्यर्थः।तत्रेति हेत्वाभासेनिरूपणीयेबाधिता इति पंचैवेति शेषः।
सव्यभिचारश्चेति।सव्यभिचारत्वं च साध्यसंदेहजनककोटिद्वयोपस्थापकतावच्छेदकरूपवत्त्वं।तच्च साधारणत्वादीति मंतव्यं।सव्य
भिचारस्य त्रैविध्यमाह।साधारणेति।तत्रेति त्रिविधव्यभिचारे साध्यवदन्येति।धूमवान्वह्निरित्यादौ साधारणे साध्यवदन्योऽयोगोलकं व राम
ह्निमत्त्वादित्यर्थः।नन्विदं लक्षणं धूर्नित्या गंधवत्त्वादित्यसाधारणे संयोगसाध्यकद्रव्यत्वे चातिव्याप्तिरित्याह।साध्यासामानाधिकरणेति। ३७

यद्यप्येवमपि स्वनित्यागंधवत्वादित्यसाधारणो सर्वमनित्यं प्रमेयत्वादित्यनुपसंहारिणि निष्कलङ्कत्वाभावात्तथापि उपाधेस्संकरात्
अत एव मणिकृतोपि उपाधेस्संकरेणैवेति वक्ष्यति। तथा च वक्ष्यतो साध्याभाववत्तद्वृत्तिर्वा साधारणोपि पक्षे साध्यसंदेहरूप पक्ष-
तावच्छायां एतद्द्वयमेवोद्भावयितुं शक्यते तेन तयोर्भेदेनोपन्यासः। साध्येति। साध्यस्य नित्यत्वस्य व्यापको हेतोर्यो भावः शब्दत्वाभा-
वसमव्याप्तियोगित्वं शब्दत्वसद्धेतुत्वादेरलक्ष्यत्वादित्यर्थः। एतत्तज्ज्ञाने असाधारणज्ञाने। साकाङ्क्षाया भावावगाहिज्ञानजननात्तत्
त्कथं तदाह व्यतिरेक इति। अनेन शब्दत्वेन हेतुना साध्यानित्यत्वव्यतिरेके साध्य इत्यर्थः। सत्प्रतिपक्षत्वे पञ्चैव हेत्वाभासा इति वि-
भागव्याघात इति भावः। हेतुभेद इति। तथा च समानबलोपस्थिता प्रतिरुद्धकार्य्यलिंगत्वरूपं सत्प्रतिपक्षत्वं लिंगभेदघटितमि-
त्यर्थः। अस्य शब्दत्वादेः व्यतिरेके अनित्यत्वे साध्ये सत्प्रतिपक्षत्वं नित्यत्वस्येव नित्यत्वव्यतिरेको ज्ञापकव्याप्यादिमत्वं। ज्ञानि

सि॰टी॰ दप्यनित्यपीतिबोध्यं।तेनोभयानुमानएवान्वयसहचारज्ञानासंभवेन उभयानुमानएव शब्दत्वहेतोर्नान्वयित्वं।किंतुव्यतिरेकित्वमि
३८ ति।उभयानुमानएव तथाचेत्यादिनाव्यतिरेकदर्शनेन्यूनतानेतिमंतव्यं।नित्यत्वव्यापकेति।अनित्यत्वाभावव्यापकीभूतेत्यर्थः।
साध्याभावमपिनित्यत्वाभावमपीत्यर्थः।ननुपरस्परप्रतिबंधात्कथंतत्तदभावयोर्ज्ञानमतआह ज्ञानचेति।तथाचसाध्यानित्यत्वतत्तद
भावयोरेवाज्ञानमित्यर्थः।अत्रकेचित्।तत्तदभावयोर्व्याप्यवत्ताज्ञानात्।तत्तदभावयोरेवसंशयाकारानुमितिर्जायते।एवंसत्यपि
रूपस्थलेपीति।नचतदभावव्याप्यवत्ताज्ञानत्वेनतद्विशिष्टबुद्धित्वेनप्रतिबध्यप्रतिबंधकभावात्।कथंसंशयाकारानुमितिर्जा राम
यतइतिवाच्यं।लौकिकप्रत्यक्षान्यत्वदोषजन्यत्वशब्दान्यत्वादीनांप्रतिबध्यतावच्छेदकेऽवश्यंवेशेविशेषणविशेष्यभावेविनिगम ३८
नाविरहेणानेककार्यकारणभावेवरंअनुमित्यंतर्भावेनप्रतिबध्यप्रतिबंधकभावविरहात्।नचयासंन्यूनत्रिप्रत्यक्षान्यत्वादेःप्रतिकं

ध्यतावच्छेदकतेत्येकएव प्रतिबध्यप्रतिबंधकभाव इति वाच्यो व्याप्यप्रत्यक्षत्वावच्छेदकतांशाकांक्षितं विशिष्टबुद्धिं प्रतिकारणत्वात्तात्तथा
चैककारणविशेषापत्तेः अथैवं प्रत्यक्षान्यज्ञाननिष्ठापरोक्षत्वाव्याप्यैकाजातिरेवानुपमितित्वशाब्दस्मृतिसाधारणी तदभावव्याप्यवत्ता
ज्ञानप्रतिबध्यतावच्छेदिकासिद्धतानि चेन्नः अनुभवत्वमादाय सांकर्यात्। अनुभवत्वं प्रत्यक्षेतरत्र न प्रतिबध्यतावच्छेदिकाजाति
प्रतिबध्यतावच्छेदकाजातिसिद्धौ तत्र चनानुभवत्वमिति परस्परात्यंताभावसमानाधिकरणयोः शाब्दोपमित्यनुमित्यादेरुभयोः
समावेशात्तान्न चैवं प्रतिबध्यतावच्छेदिकाजातिः स्मृतिव्यावृत्तेपवाक्षसांकर्यादेवरानुभवत्वं जातिर्मास्तु न तु परोक्षत्वमपी
तिवाच्यं। तथाप्यनुमितित्वमप्रतिबध्यतावच्छेदकतयासिद्धजातिमादाय सांकर्यात्। अनुमितौ प्रत्यक्षे च परस्परात्यंताभाव
सामानाधिकरण्ययोरेकस्मिन्नुपमित्यादौ सांकर्यात्। यथा चैकप्रतिबध्यप्रतिबंधकाभावे विशिष्टानुमितित्वादिना न तदभा

सि॰टी॰ वयाप्यवत्ताज्ञानप्रतिवध्यत्वेनेतिसिद्धेवमस्त्वितिपक्षासाधारण्यादौसंशयाकारानुमितिरितिप्राहुः। तन्नेतिकेचित्। तथाहिप्रत्यक्षरूपावृत्ता
३९ विशेषणानिष्ठाप्रका। विधेयतैवप्रतिवध्यतावाच्या। वह्निमदनुमिनोमीत्यनुभवसाक्षिकामेवचबाधसिद्ध्यादीनांप्रतिवध्यतावच्छेद
केतितांविधेयतामादायएकप्रतिवध्यप्रतिवंधकाभावेनतसंशयाकाशनुमित्येत्याहुः। तच्चिंत्यं पर्वतोवह्निमानितिसिद्धौविद्यमा
नायामपिवह्निमान्पर्वतोघटव्याप्यवानितिपरामर्शात्वह्निमान्पर्वतोघटवानितिअनुमितिदर्शनात्। पर्वतोद्देश्यतावच्छेदका
कवह्निप्रकारानुमितित्वंनतादृशसिद्धिप्रतिवध्यतावच्छेदकं। किंतुवह्न्यादिनिष्ठविलक्षणांविधेयतैवप्रतिवध्यतावच्छेदिकातयैव
पर्वतेवह्निमनुमिनोमिनतुवह्नित्वपर्वतत्वादिकंमनुमिनोमीतिधीः। साचविधेयताप्रत्यक्षरूपाहृतेतिवक्तुमशक्या। तथाहितदभा राम
वापादककस्यापत्तित्वेनप्रतिबंधकतातदभावविशिष्टबुद्धित्वेनप्रतिवध्यतेतिप्रतिवध्यप्रतिबंधकभावबलादेवपर्वतोयादृशि ३९

वह्निः स्यात्तत्तदा निर्धूमं स्यादित्यापत्तेरेव पर्वतो वह्न्यभावसंशयोच्छेददर्शनात्। निरुक्तविधेयतावत्त्वदापत्तिप्रतिबध्यमानेऽस्मादिसाधार
ण्येव वाच्येति प्रत्यक्षव्याप्तत्वं तस्याऽसिद्धं अन्यथा पर्वतो यदि निर्वह्निः स्यात्तत्तदा निर्धूमोपि स्यादित्यापत्तौ विद्यमानायामपि निर्व
ह्निः पर्वतो घटवानित्यादिमानसस्याप्युत्पत्त्यापत्तेः। अतः पर्वतत्वोद्देश्यतावच्छेदककविलक्षणविधेयताकवह्न्यभावज्ञानत्वं
तादृशापत्तिप्रतिबद्धतावच्छेदकं वाच्यमिति सिद्धमेव विधेयताविशेषस्य प्रत्यक्षादिसाधारणमित्यलंपल्लवेन वक्ष्यतोऽप्यापत्तिप्र
तिबद्धतावच्छेदिका यदि प्रत्यक्षानुमित्यादिसाधारणी विलक्षणविधेयता प्रत्यक्षान्यधीनिष्ठा च सिद्धप्रतिबद्धतावच्छेदकान्याचे
त्तदा क्रियते तदा संशयाकारानुमितिवारणं गौरवाणपुरोऽप्यशक्यमिति तत्त्वं। लाघवादाह। अव्याप्तिसाध्यकत्वेति। सर्वमभिधेयं प्र
मेयत्वादित्यादिसिद्धेरेव वह्निमानाकाशादित्यत्र असिद्धविरुद्धान्यतरभूतमेवेति ध्येयं। केचित्तु केवलान्वयिधर्मावच्छिन्नसाध्यसंदेह

 विषयवृत्तित्वं अनुपसंहारित्वं तथा च सर्वमभिधेयं प्रमेयत्वादित्यादिकमेव साध्यसंदेहदशायामनुपसंहारी। वह्निमानाकाशात्। आकाश
 वान्वह्नेरित्यादिकं तु यथा पक्षमसिद्धबाधितान्तर्गतमिति पाठः। साध्यसमानाधिकरणेति। साध्यतावच्छेदकसंबंधेन साध्याधिकर
णे हेतुतावच्छेदकसंबंधेन हेतुत्वमित्यर्थः। तेन गोत्वाश्वत्वयोः कालिकेन संबंधेन सामानाधिकरण्येपि न व्याप्तिरिति ध्येयं। अत्रासा
धारणत्वमेवेत्येवकारोऽप्यर्थो साधारणत्वं चेति। चकारेण निरुक्तविरुद्धत्वग्रहः। तथाप्युपाधीनि उपाधिभेदः साधारणत्वासाधारणत्ववि
रुद्धत्वादीनां भेदः। तथा च तत्तदुपाधिकृतो भेदव्यवहारस्तत्तेन तत्वेन ज्ञानदशायामस्त्विति प्रतिबंधकत्वं निर्वहतीति मंतव्योपरे इति। अ
त्र परे इति संपातायातं साध्याभाववति वृत्तिर्बाधकः। परामर्श इत्येतावन्मात्रस्यैव सत्वादिति पाठः कृत्वान्। एतावतैव सत्प्रतिपक्षो साध्यसिद्धिविरो
धिपरामर्शविषयसमव्याप्तिपक्ष इति योगार्थस्यापि निर्वाहादिति ध्येयं। उदाहरति। यथेति। असिद्धलक्षणमाह। व्यभिचाराद्यन्यत्वेति। आदि

पक्षेन विरुद्धसंग्रहः परामर्शप्रतिबंधकत्वस्य व्याप्तिधीविघटनद्वारा तत्रापि सत्त्वादिति भावः स्वरूपासिद्ध्या अन्यतमत्वमेव तत्त्वमित्यपि केचि
त्तस्या असिद्धिरित्यर्थः। स्वरूपासिद्धिलक्षणमाह। पक्ष इति उदाहरति यथा घट इति आश्रयासिद्धिलक्षणमाह। पक्ष इति। पक्षतावच्छेदकासिद्धिर
भाव इत्यर्थः। व्याप्यत्वासिद्धिलक्षणमाह ननु भयेति। आश्रयासिद्धिस्वरूपासिद्धिभिन्नो। सिद्धो व्याप्यत्वासिद्ध इत्यर्थः। अन्नासिद्धिरिति विशे
ष्यदलाद्भिन्नसव्यभिचारादावतिप्रसंगः एवं च हेतुविशेषणवैयर्थ्यसाध्यविशेषणवैयर्थ्यादिना विधं यथा अयं व्याप्यत्वासिद्धो धूमो धू
लीपटल इति इदमुपलक्षणं हेतुविशेषणवैयर्थ्यात् तत्राजधूमादिरपि व्याप्यत्वासिद्ध इति मंतव्यं। लाघवादाह। साध्येति। तथा च साध्य
तावच्छेदकावच्छिन्नाप्रसिद्धिः हेतुतावच्छेदकावच्छिन्नाहेत्वप्रसिद्धिर्वेति लक्षणद्वयार्थः। तथा च हेत्वप्रसिद्धावपि तद्दोषो नाव्याप्तिः। सा
ध्याप्रसिद्धावपि तत्साध्यनिरूपितव्याप्तेर्नेति तत्र व्याप्यत्वासिद्धत्वं। बाधलक्षणमाह पक्ष इति साध्यशून्यत्वं साध्यसामान्याभा

सि.टी. वच्छत्वं इत्यर्थः। तेन विशेषाभावमादाय न सद्धेतौ दोषः। न वा चेति। अत्र जलादिपक्षकवह्न्यनुमाने कर्तव्ये इत्यर्थः। न त्वेवं बाधस्यानित्यदोषतास्या
४१ त्। परामर्शभ्रमकाल एव दोषत्वं। न तु परामर्शसत्त्वकाले तत्त्वसिद्ध्यादेरेव दोषत्वादित आह। आद्यकालावच्छिन्न इति। अत्र यद्यपि पक्षता
वच्छेदकसामानाधिकरण्येनानुमितौ सामानाधिकरण्येन बाधान दोषस्तथापि पक्षतावच्छेदकावच्छेदेनानुमितौ पक्षतावच्छे
देनेह बाधादोष इति मंतव्यं। पक्षाद्यन्निर्वक्ति। तथा च न बाधव्याप्यत्वासिद्धिर्न बाधस्वरूपासिद्धिस्तत्र दोषः अपि तु बाध एवेति। तत्त्वादिगर्भ
ज्ञानरूपसिद्ध्यादीनां न हेत्वाभासत्वं। हेत्वाभाससामान्यलक्षणस्याभावात्। ज्ञायमानदोषएव हि तस्य संभवात्। न चाज्ञाना
सिद्ध्यादितथेत्यादि मंतव्यं। अत एवेति। पंचैवेत्यर्थः। तदन्यतर इति। सव्यभिचाराद्यन्यतरांतर्गत इत्यर्थः। अनेवंभूतत्वात्। अहेत्वा राम
भासत्वात्। व्यक्ततो व्यभिचारानुमानद्वारा उपाधेरनुमानप्रतिबंधकत्वेन परस्तु विनिरीक्ष्यतया न दोषत्वं। अनुमितितत्त्वा ४१

णाद्यसाध्यवान्साध्यव्याप्यवानित्याकारकसमूहालंबनानुमितेर्वा माहात् प्रतिबंधकत्वस्यैव हेत्वाभासत्वात्तत्र समाहानत्राप्र
तिबंधकस्य परमुखनिरीक्षकस्य नोपाधेः संभवतीति तत्वं। अत्रत्र एव परमुखनिरीक्षकत्वादेव सिद्धसाधनेति। तथा च पक्षता वि
घटनद्वारा हितदनुमिति प्रतिबंधकेन तस्मात्मादिति न हेत्वाभासत्वमिति भावः। प्रसंगादुपाधिं निरूपयितुमाह। नचेति आ
चार्याः कृत्यर्थे आचार्य इत्यर्थः। अन्यथा यौगिके साध्यसमव्याप्तत्वस्यैवोपाधित्वस्य तैः स्वीकारादिति ध्येयं। लाघवादभावा
गर्भितं व्यापकत्वमाह। तत्समानाधिकरणेति। यत्समानाधिकरणाव्यापकत्वेनाभिमतसमानाधिकरणा इत्यर्थः। लक्ष्ये लापयति
यद्यर्थेति। धूमसमानाधिकरणा इति। पतः इत्यादि। तदसत्वात्। तथा च तत्वनिष्ठात्यंताभावप्रतियोगित्वमेव तद्व्यापकत्वमितिभा
वः। मेवं नोपाधिरित्यर्थः। इदं उक्तोपाधिलक्षणे श्यामत्वव्यापकं शुद्धश्यामत्वव्यापकमित्यर्थः। किंलिति। साधनी भूतमित्रातनय

सि॰टी॰ त्वावच्छिन्नश्यामत्वव्यापकमित्यर्थः॥ अथेति॥ तथा च मित्रातनयत्वसाधनावच्छिन्नव्यापकं शाकपाकजत्वं मित्रातनयत्वसाधनाव्या
४२ पकत्वं च भवत्येवोपाधिरिति भावः॥ अव्याप्तिं लापयति॥ न हीति॥ एतत्तउद्भूतरूपवत्त्वं वहिर्द्रव्यत्वेति॥ पक्षधर्मीभूतवहिर्द्रव्यत्वे
त्यर्थः॥ कथं व्यापकतेत्यत आह॥ यावतीति॥ तद्वृत्ति वहिर्द्रव्यत्वावच्छिन्नवृत्त्यपक्षत्ववतीत्यर्थः॥ नह्यस्मिन्ननुमाने उद्भूतरूपवत्त्व
संग्रहाय पक्षधर्मावच्छिन्नसाध्यव्यापकतागर्भितमेवोपाधित्वं वाच्यमित्याह॥ अथेति॥ यथोक्तेति॥ सश्यामो मित्रातनयत्वा
दित्यादौ॥ तथाविधेति॥ पक्षधर्मीभूतद्रव्यत्वाद्यवच्छिन्नेत्यर्थः॥ पक्षैकादेशासत्त्वादुपाधेः शाकपाकजत्वस्यासत्त्वात्॥ ननु किंचिदवच्छि
न्नसाध्यव्यापकत्वे सतीत्येव लक्षणे निवेशनीयं न तु साधनपक्षधर्मादीनां विशिष्टांतर्भाव इत्याशंकते॥ यत्किंचिद्धर्मावच्छिन्नेति॥ म राम
हानसत्त्वाभावेऽतिव्याप्तिं लापयति॥ भवतीहीति॥ तादृशेति॥ महानसान्यत्वावच्छिन्नवह्निमतीत्यर्थः॥ असत्त्वात् महानससत्त्वाभावस्येत्या ४२

द्विष्ठानधिकरणेति। स्वं उपाधित्वेनाभिमतं शाकपाकजत्वादि तदनधिकरणीभूतं साधनाधिकरणं गौरमित्रातनयत्वादि तद्वृ
त्तिधर्मो मित्रातनयत्वं भवति च तदवच्छिन्नश्यामत्वव्यापकं शाकपाकजत्वं। तथा च काकेतादृशश्यामत्वशून्ये शाकपाकजत्व
विरहेपि क्षतिविरहात्। एवं स्वं उद्भूतरूपं तदनधिकरणं गगनादि तद्वृत्तिधर्मो वहिर्द्रव्यत्वं भवति च तदवच्छिन्नप्रत्यक्षत्वव्यापकं
उद्भूतरूपवत्त्वं तथा चात्मनि तादृशप्रत्यक्षत्वशून्ये उद्भूतरूपविरहेपि क्षत्यभावात् एवं धूमवान्वह्नेरित्यादौ उद्भूतसाध्यव्याप
के स्वार्द्रेन्धने तदनधिकरणसाधनाधिकरणायोगोलकवृत्तिपर्वतत्वायोगोलकान्यतरत्वावच्छिन्नसाध्यव्यापकतासत्वात् सद्धे
तो महानसत्वाभावे तु नैवं व्याप्तिकरिष्यति सर्वमपयद्गतिध्येयं न चैवं नानाव्यक्तिकोपाधौ लक्षणाननुगमो दोषः स्वत्वगर्भित
त्वात्। किं च तत्तदार्द्रेन्धनानधिकरणवृत्तिधर्मावच्छिन्नसाध्यं पर्वतत्वत्वारादिपु तावन्तो वसाध्याः तानव्यापकं तत्तदार्द्रेन्धने

सि॰टी॰ अपिच संयोगी सत्त्वादित्यत्र गुणकर्मान्यत्वविशिष्टसत्तायाः सत्तारूपत्वेन स्वाधिकरणसाधनाधिकरणसाधनाधिकरणाप्रसिद्धेर्
४३ तत्राह। वह्नेति स्वावच्छिन्नेति। स्वं उपाधिस्तदवच्छेदकं। तच्चैतादृशसाध्यव्यापकत्वं चव्यापकत्वं लापयति भवति हीति। अतस्तदा
इंधनमिति। उपाधिः द्रव्यत्वादि किंचिद्धर्मावच्छिन्नसाध्यव्यापकतावच्छेदकावच्छिन्नरूपवत्त्वमुपाधिः शाकपाकजत्वमुपा
धिरित्याद्यग्रेपि व्याख्येयं सद्धेतौ प्रसिद्धानुमाने महानसत्वाभावेऽतिव्याप्तिं वारयति। नन्वेवमिति। अत एव अव्यापकत्वादेवत्र
व्यापकत्वमेवाह। पक्षमात्रेहन्नीति। तथा च स्वानधिकरणीभूतसाधनाधिकरणवृत्तिधर्मावच्छिन्नं साध्यं पक्षेपि तन्मात्रेवृत्तिधर्मस्या
पि यावदंतःपाति तथा तत्सामानाधिकरण्यस्य पक्षेतरत्वेऽभावात्पक्षेतरत्वस्याव्यापकत्वमिति भावः। संक्षेप इति। बाधोन्नीत पक्षेत राम
रत्वं उपाधिरेवेत्यवधेयं। यथा वह्निरनुष्णः कृतकत्वादित्यादौ वह्नीतरत्वमित्याद्यूह्यं। सद्धेतौ पर्थानुमाने प्रतिज्ञादौ पंचावयवप्रयोग ४३

घटितन्यायापेक्षणात् तेषां प्रतिज्ञादीनां स्वरूपमाह। तत्रैवेति। संहतावित्यर्थः। उदासीनन्यायाघटकोन्मत्ताद्युक्तपर्वतो वह्निमानिति
वाक्यातिव्याप्तिवारणायाह न्यायेति। तथा च तादृशतादृशमुन्मत्ताद्युक्तं वाक्यं न न्यायघटकमिति तद्व्युदास इत्यर्थः। न्यायश्च उचि
तानुपूर्वीकप्रतिज्ञादिपञ्चसमुदायः। वह्निव्याप्यधूमकामिकेत्यादिना ग्रन्थकृतैव चेदिति ध्येयं। पर्वतो वह्निमानिति शब्देति तथा
च शब्दानां तेषां भिन्नत्वात् प्रतिज्ञात्वादिकं भिन्नमेवेति भावः। अवयवविभाजकेति। अवयवविभाजकप्रतिज्ञात्वादिकमेवेति
भावः। अत एव उद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकं वाक्यं प्रतिज्ञेति सामान्यतः प्रतिज्ञालक्षणमिति मणिकृतः
तदुक्तोपदेशस्यानिर्देशप्रतिज्ञेति सूत्रे चोपपद्यते। एतत् सूत्रादितानीति अत्रापि सर्गवतान्यायान्तत्वे विशेषणं बोध्यं तादृशेति। अवय
वविभाजकेत्यर्थः। तद्धेतुत्वादीति मेतव्यं। एतत्तयोर्योध्वमवानिति तत्रापि न्यायान्तर्गतत्वे सतीति प्रवेष्टव्यं। एवमुपनयनिगम

सि॰दी॰ नयो यथायथं व्याख्येयं। प्रतिज्ञादिलक्षणविनष्टावयवत्वं निर्युक्तिः अवयवत्वमिति स्वोक्तेः प्राचां सम्मतिमाह। उक्तं चेति। अवसर
४४ संगत्योपमानं निरूपयितुमाह। अथेति। अथ उपमाननिरूपणप्रतिबंधकानुमाननिरूपणप्रतिबंधकानुमानजिज्ञासानिवृ
त्तिलक्षणमित्यर्थः। शिष्यावधानार्थं प्रतिजानीते निरूप्यत इति लक्षणस्वरूपप्रामाण्यादिभिर्निरूप्यत इत्यर्थः। उपमिनोमीत्यनु
भवेति। तस्याश्च प्रत्यक्षबलादुपमितित्वं जातिरित्यर्थः। उपमिनोमीत्यनुव्यवसायापलापेनाह शाब्दविषयत्वेनानुमित्यादीत्या
दिपदात् शाब्दादिपरिग्रहः। उपमितिलक्षणे संभवमाशंकते। ननूपमितौ तिक्तौषधी ज्वरं हन्तीति प्रश्ने दृशहलसहशब्द
रं हन्तीत्युक्ते तत्रोपमित्या ज्वरणकार्यकारणभावग्रहस्तत्रोपमितेः शक्तिपदादिविषयकत्वव्यभिचारादिति भावः। न च पदमि राम
त्युपमितेः शक्तिविषयतानियमेन कास्त्रौषधीरित्यादावपि पदविषयताचावश्यकी कार्यकारणभावग्रहस्तत्रानुमित्या नत् ४४

पमित्येतिभावः।उपमितिकरणंनिरूपयितुंइच्छति।कुतइतिशाब्दस्यादीति।तथाचसादृश्यानुभवकरणंतत्स्मृतिर्व्यापारः।उपमितिफल
मितिभावः।इदमेवविशदयति।तथाहीति।नचैवमुपमितिः।क्व_ नचारूपादिवमित्यंतर्गतैवाक्त्रा।क्तेतदर्थमपिमानेत्साशंकांपरिह
रतिनहीतदिति।ततोविलक्षणत्वेनमानमविलक्षणत्वेनेत्यर्थः।उपमितेराकारमाहउपमितानिति।अन्यथासादृश्यावच्छेदक
त्वेऽप्रतीतीतिमूलेतिव्यवहारःशाब्दप्रयोगःसशक्तिज्ञानमूलकःस्यादित्यर्थः।गोरवेति।शक्यतानवच्छेदकत्वात्सादृश्यस्येतिभावः।अ
तइतिअनुमित्यादिविरुद्धधर्मत्वात्।तादृश्युपमितिः।करणस्यसव्यापारत्वादाह।तत्स्मृतीति।सादृश्यज्ञानंसादृश्यनिश्चयः।ततसह
कारीवाक्यार्थानुभवोपमानसहकारीत्यर्थः।तद्धेति।ततसादृश्यज्ञानजन्यइत्यर्थः।वैधर्म्यज्ञानजन्योउपमितिआह।यथेति।तदानं
तशाहेतिजलादिविधर्मापृथिवीतिगुरूक्तवाक्यार्थस्मरणादित्यर्थः।एवंएवंक्रमेणेत्यर्थः।इत्युक्तेरगुरूक्तेरित्यर्थः।इदानींसाधर्म्य

सि·टी· ज्ञानयोरेकेणरूपेणोपमितिंप्रतिकारणतेत्याह तस्मादिति। यत्किंचिदिति। सादृश्यवैधर्म्याद्यवच्छेदेनेत्यर्थः॥ विशेष्येति। विशेषा
४५ कारेणकिंचिद्धर्म्मावच्छेदेप्रागनिर्णीतशक्तिकपदवाच्यत्वरूपेत्यर्थः॥ अत एव कीदृग्गवयइति प्रश्नवाक्ये किंधर्मावच्छिन्नो गवयपद
वाच्यइत्यस्य विषयत्वंउपपद्यते। उपपद्यतेचकिंचिद्धर्मावच्छेदेनशक्तेरनिर्णयात् प्रश्नइतिध्येयं। यद्यप्यनिर्णीतशक्तिकपदजन्य
वाक्यार्थानुभवोपिनसंभवति। वाक्यार्थानुभवे शक्तिनिश्चयस्यापि हेतुत्वात्। तथापि यत्किंचिद्धर्म्मावच्छेदेनानिर्णीतशक्तिकप
दजन्याजन्यानुभवस्य शक्यतावच्छेदकांशे संदेहेपि गवयादिपदं क्वाचित्शक्तमिति निश्चयस्य संभवात् तन्मतेएव तथाहीत्यादिना सा
मान्यतो गवयपदवाच्यं। किंचिदस्तीति ज्ञानतः इति ग्रंथकृतोक्तमिति वेदितव्यं। तथा च सर्वत्र सादृश्यज्ञानजन्यवैधर्म्यज्ञानजन्योप राम
मितौ अनिर्णीतशक्यतावच्छेदकपदवाच्यतागोचरवाक्यार्थानुभवत्वेन कारणतेति भावः। किंचिद्धर्म्मविशिष्टेतितद्धताधीःकरणीभू ४५

तद्वाक्यार्थानुभवोद्देश्यतावच्छेदकसादृश्यवैधर्म्यान्यतरवत्ताधीरित्यर्थः। ननु धर्मेण गवयत्वादिज्ञानौ गुरुधर्मविशिष्टसादृश्यादिविशिष्टइ
त्यर्थः। सादृश्यादीत्यादिपदात्। क्वचिद्वाक्यार्थानुभवोद्देश्यतावच्छेदकीभूतवैधर्म्यज्ञानसहकारीभूतसादृश्यादिज्ञानविशेष्यतावच्छे
दकत्वेन ज्ञानरूपसहकारिपरिग्रहः। तदवच्छेदेनैव सादृश्यादिगुरुधर्मावच्छेदेनैवेत्यर्थः। वाच्यतेति। उपमित्यात्मको ग्रह इत्यर्थः। बाधा
त गुरुधर्मावच्छेदे शक्तौ धीवेन तद्धर्मावच्छेदेन शक्यवगाहना तत्प्रमात्वमिति भावः। संज्ञेपद इति अत्र केचित् उपमितिप्रत्यक्षप्रमि
तिनिविष्टतिनोपमानं प्रमाणान्तरमिति तथाहि। सादृश्यज्ञानप्रतिवध्यतावच्छेदकं पदवाच्यत्वस्य उपमितिभिन्नमानसत्वं मानस
त्वविशिष्टोपमितिभेदो वा सादृश्यज्ञानप्रतिवध्यतावच्छेदक इत्यत्र विनिगमकाभावेन नाना प्रतिवध्यप्रतिबंधकभावकल्पना
मपेक्ष्य लाघवान्मानसत्वमेव प्रतिवध्यतावच्छेदकमस्त्विति वाच्यं एकत्रयद्वमितिन्यायेन उपमितिभेदस्य मानसत्वस्य च प्रति

सि.दी. वध्यतावच्छेदकत्वात्। व्याप्त्युपहितनीचावच्छेदकतेति मंतव्यं। नचैवमेकविशेषणाविशिष्टेऽपरवैशिष्ट्यमिति न्यायेनावच्छेदकतायो वि
४६ निगमनावकाश इति वाच्यं। तस्य विशेष्यतावच्छेदकप्रकारकनिश्चयव्यंग्यत्वेन विलंबोपस्थितिकत्वात्। अनुरपि विशेषोऽध्यवसा
यइति न्यायात्। एकत्र द्वयमिति न्यायेनैव उपमितिभेदमानसत्वयोः प्रतिवध्यतावच्छेदकत्वं। अत एव गुणोदीधितिकृतापि एकत्वत्वा
पेक्षया एकपृथक्त्वत्वस्यावधिज्ञानत्वं गपत्वेन गुरुत्वमुक्तं। अथैवमुपमितेर्मानसत्वे गवयपदवाच्यत्वमुपमिनोमि न साक्षात्क
रोमीति न स्यात्। अस्मन्मते उपमितेर्मानसज्ञानत्वेन तत्रापि साक्षात्कारत्वसत्वादिति चेन्नैवं न साक्षात्करोमीतिप्रतीत्या तत्र साक्षा
त्कारत्वाभावो न विषयीक्रियते। किंतु लौकिकविषयत्वाभाव एव विषयीक्रियते। अत एव सुरभिचंदनमिति चाक्षुषानंतरं चंदनं राम
साक्षात्करोमि न सौरभमिति प्रत्ययोप्युपपद्यते। तत्रापि सौरभे लौकिकविषयत्वाभावस्यैवावगाहनात्। तस्मादुपमितिर्मानसज्ञान ४६

रूपेति न तत्करणं प्रमाणांतरमिति व्याहतं चेत्वात् पर्यवसमाणानीति शब्दः तदुक्तमित्याहुः तत्तु छंलाघवात् मानसत्वजाते रेव सादृश्य
ज्ञानप्रतिवद्धतावच्छेदकत्वात् न तदुपमितिः। भिन्नमानसत्वाद्युपाधे गुरुधर्म्मस्य एवं च मानसत्वस्य प्रतिवध्यतावच्छेदकत्वे लाघवात्तत्सिद्धे
उत्तरं उपमितित्तत्करणकार्यकारणभावादिकल्पने फलमुखगौरवतया न दोषमावहतीति। न च तथापि यदिच्छा घटादिविषयिण्या
तदा गोसादृश्यज्ञाने विद्यमानेपि घटादिमानसदर्शनात् तत्तन्मानसेच्छाभावविशिष्टगोसादृश्यादिज्ञानत्वेन तत्तन्मानसत्वेनेति।
।विशिष्येवा प्रतिवध्यप्रतिवंधकभावावश्यकत्वे द्वालाघवमिति वाच्यं। तथापि मानसत्वाविरुद्धोपमितित्ववादिनां उपमित्यनुमा
नमसंजायत मितीच्छायामपि सादृश्यज्ञानोत्तेजकत्वं वाच्यं। तदेव न वाच्यमिति लाघवस्यैव जागरूकत्वात्। गवयपदवाच्यत्वोपमि
तेरेवेति तादृशेच्छायाश्च उत्तेजकत्वात् उक्ततो उपमितित्वस्य मानसत्वव्याप्यत्वे यत्र गवयपदवाच्यत्वस्य उपमितिर्जायत इति।

॥सि॰दी॰॥ ह्यापरवाच्यत्वसमानसंज्ञायतामित्यपीच्छा।एवमुपमितिर्जायतां उपमितिमितिर्मानसं वा जायतामिति वा इच्छा तत्रोभयत्रैव उपमितेरे
॥ ४७ ॥ वजायते न तु मानसमिति सर्वसिद्धं अन्यथा उपमितिर्मानसत्वे उक्तेच्छावशात् उपमितिवत् तदन्यमानसस्याप्यापत्तेः। नन्वाप्यध
र्मावच्छिन्ने जायमाने व्यापकधर्मावच्छिन्नेन जायत इत्युपमितितदन्यमानसं समूहालंबनमेव स्यात्। अतो मादृशपज्ञानादेः प्रतिबंधकमा
नसत्वमेव न तु मित्यन्यस्यापि प्रवेश इति तत्वो उपमानशब्दनिरूपणयोः एकप्रयोजनकत्वव्याप्यां संगतिं प्रदर्शयन्नुशिष्यावधानाय
च प्रतिजानीते ऽथेत्यादिना इहाथपदेन उपमाननिरूपणानंतरस्त्रुण इति लाक्षणिकेन आनंतर्यावच्छिन्नस्थिते उपमाननिरू
पणे शब्दो निरूप्यत इत्यनेन वर्तमानानाताकलटप्रत्ययांतत्वेन साध्यताया उपस्थितस्य च शब्दनिरूपणोभयोरेव सिद्धसाध्यसमभिव्या राम
हारहेतुकानुमानलभ्यस्य हेतुहेतुमद्भावस्य संगतित्वं सूच्यते। अत्रानुमाने व्याप्तिश्च साध्यत्वरूपेणायत्निष्ठस्वाधिकरणक्षणवृत्तिश्च ४७

रुमापतेः